॥ श्रीगणेशाय नमः ॥

अथाऽयोध्यामाहात्म्यारम्भः

प्रथमोऽध्यायः

विष्णुहरिमाहात्म्यवर्णनम्

जयति पराशरसूनुः सत्यवतीहृदयनन्दनो व्यासः ।
यस्याऽऽस्यकमलगलितं वाङ्मयममृतं जगत्पिबति ॥ १ ॥

नारायणं नमस्कृत्य नरञ्चैवनरोत्तमम् । देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥ २

व्यास उवाच

हिमवद्वासिनःसर्वे मुनयो वेदपारगाः । त्रिकालज्ञा महात्मानो नैमिषारण्यवासिनः ॥
येऽर्बुदारण्यनिरता दण्डकारण्यवासिनः । महेन्द्राद्रिरतायेवै ये चविन्ध्यनिवासिनः
जम्बूवनरता ये च ये गोदावरिवासिनः । वाराणसीश्रिता येच मथुरावासिनस्तथा ॥
उज्ज्ञयिन्यां रता ये च प्रथमाश्रमवासिनः । द्वारावतीश्रिता येच बदर्य्याश्रयिणस्तथा
मायापुरीश्रिता ये चयेचकान्तीनिवासिनः । एतेचान्येचमुनयःसशिष्याबहवोऽमलाः
कुरुक्षेत्रे महाक्षेत्रे सत्रे द्वादशवार्षिके । वर्तमाने च रामस्य क्षितीशस्य महात्मनः
समागताः समाहूताः सर्वे ते मुनयोऽमलाः ॥ ८ ॥

सर्वे ते शुद्धमनसो वेदवेदाङ्गपारगाः । तत्रस्नात्वा यथान्यायं कृत्वा कर्म जपादिकम्
भारद्वाजं पुरस्कृत्य वेदवेदाङ्गपारगम् । आसनेषु विचित्रेषु बृष्यादिषु ह्यनुक्रमात्
उपविष्टाः कथाश्चक्रुर्नानातीर्थाश्रितास्तदा । कर्मान्तरेषुसत्रस्यसुखासीनाःपरस्परम्
कथान्तेषु ततस्तेषां मुनीनांभावितात्मनाम् । आजगाममहातेजास्तत्रसूतोमहामतिः

व्यासशिष्यः पुराणज्ञो रोमहर्षणसञ्ज्ञकः । तान्प्रणम्य यथान्यायं मुनीनांवचनेनसः
उपविष्टो यथान्यायं मुनीनां वचनेन सः ॥ १३ ॥

व्यासशिष्यं मुनिवरं सूतं वै रोमहर्षणम् । तं पप्रच्छुर्मुनिवरा भारद्वाजादयोऽमलाः

ऋषय ऊचुः

त्वत्तः श्रुता महाभागनानातीर्थाश्रिताःकथाः । सरहस्यानिसर्वाणिपुराणानिमहामते
साम्प्रतंश्रोतुमिच्छामःसरहस्यंसनातनम् । अयोध्यायामहापुर्यामहिमानंगुणोज्ज्वलम्
कीदृशीसा सदा मेध्याऽयोध्या विष्णुप्रिया पुरी ।
आद्या सा गीयते वेदे पुरीणां मुक्तिदायिका ॥ १७ ॥
संस्थानं कीदृशं तस्यास्तस्यां के च महीभुजः ।
कानि तर्थानि पुण्यानि महात्म्यं तेषुकीदृशम् ॥ १८ ॥
अयोध्यासेवनान्नृणां फलं स्यात् सूत! कीदृशम् ।
किं चरित्रं सूत! तस्याः का नद्यः के च सङ्गमाः ॥ १९ ॥
तत्र स्नानेन किं पुण्यं दानेन च महामते! ।
तत्सर्वं श्रोतुमिच्छामस्त्वत्तः सूत! गुणाधिक! ॥ २० ॥
एतत्सर्वं क्रमेणैव तथ्यं त्वं वेत्थ साम्प्रतम् ।
अयोध्याया महापुर्या माहात्म्यं वक्तुमर्हसि ॥ २१ ॥

सूत उवाच

व्यासप्रसादाज्जानामिपुराणानितपोधनाः । सेतिहासानिसर्वाणिसरहस्यानितत्त्वतः
तं प्रणम्य प्रवक्ष्यामि माहात्म्यंभवदग्रतः । अयोध्यायामहापुर्यायथावत्सरहस्यकम्
विद्यावन्तं विपुलमतिदं वेदवेदाङ्गवेद्यं श्रेष्ठं शान्तं शमितविषयं शुद्धतेजोविशालम् ।
वेदव्यासं सततविनतं विश्ववेद्यैकयोनिं पाराशर्य्यं परमपुरुषं सर्वदाऽहं नमामि ॥२४
ॐनमोभगवतेतस्मैव्यासायामिततेजसे । यस्यप्रसादाज्ज्ञानामिह्ययोध्यामहिमामहम्
श्रृण्वन्तु मुनयः सर्वे सावधानाः सशिष्यकाः ।
माहात्म्यं कथयिष्यामि अयोध्याया महोदयम् ॥ २६ ॥

उदीरितमगस्त्याय स्कन्देनाऽश्रावि नारदात् ।
अगस्त्येन पुरा प्रोक्तं कृष्णद्वैपायनाय तत् ॥ २७ ॥
कृष्णद्वैपायनाच्चैतन्मयाप्राप्तं तपोधनाः । तदहं वच्मि युष्मभ्यंश्रोतुकामेभ्यआदरात्
नमामि परमात्मानं रामं राजीवलोचनम् । अतसीकुसुमश्यामं रावणान्तकमव्ययम्
अयोध्या सा परा मेध्या पुरी दुष्कृतिदुर्लभा ।
कस्य सेव्या च नाऽयोध्या यस्यां साक्षाद्धरिः स्वयम् ॥ ३० ॥
सरयूतीरमासाद्य दिव्यापरमशोभना । अमरावती निभा प्रायः श्रिता बहुतपोधनैः
हस्त्यश्वरथपत्त्याढ्या सम्पदुच्चा च संस्थिता ।
प्राकाराढ्यप्रतोलीभिस्तोरणैः काञ्चनप्रभैः ॥ ३२ ॥
सानूपवेषैः सर्वत्र सुविभक्तचतुष्टया । अनेकभूमिप्रासादाबहुभित्तिसुविक्रिया ॥३३॥
पद्मोत्फुल्लशुभोदाभिर्वापीभिरुपशोभिता । देवतायतनैर्दिव्यैर्वेदघोषैश्च मण्डिता ॥
वीणावेणुमृदङ्गादिशब्दैरुत्कृष्टताङ्गता । शालैस्तालैर्नालिकेरैःपनसामलकैस्तथा ॥३५
तथैवाम्रकपित्थाद्यैरशोकैरुपशोभिता । आरामैर्विविधैर्युक्ता सर्वर्तुफलपादपैः ॥ ३६
मालतीजातिबकुलपाटलीनागचम्पकैः । करवीरैः कर्णिकारैः केतकीभिरलङ्कृता ॥
निम्बजम्बीरकदलीमातुलिङ्गमहाफलैः । लसच्चन्दनगन्धाढ्यैर्नागरैरुपशोभिता ॥
देवतुल्याप्रभायुक्तैर्नृपपुत्रैश्च संयुता । सुरूपाभिर्वरस्त्रीभिर्देवस्त्रीभिरिवावृता ॥ ३९॥
श्रेष्ठैः सत्कविभिर्युक्ताबृहस्पतिसमैर्द्विजैः । वणिग्जनैस्तथा पौरैःकल्पवृक्षैरिवावृता
अश्वैरुच्चैः श्रवस्तुल्यैर्दन्तिभिर्दिग्गजैरिव । इति नानाविधैर्भावैरुपेतेन्द्रपुरीसमा ॥
यस्यांजातामहीपालाः सूर्यवंशसमुद्भवाः । इक्ष्वाकुप्रमुखाः सर्वे प्रजापालनतत्पराः ॥
यस्यास्तीरे पुण्यतोया कूजद्भृङ्गविहङ्गमा । सरयूर्नाम तटिनी मानसप्रभवोल्लसा
धर्मद्रवपरीता सा घर्घरोत्तमसङ्गमा ।
मुनीश्वराश्रिततटा जागर्ति जगदुच्छ्रिता ॥ ४४ ॥
दक्षिणाच्चरणाङ्गुष्ठान्निःसृता जाह्नवी हरेः । वामाङ्गुष्ठान्मुनिवराः सरयूर्निर्गता शुभा ॥
तस्मादिमे पुण्यतमे नद्यौ देवनमस्कृते । एतयोः स्नानमात्रेण ब्रह्महत्यां व्यपोहति

तामयोध्यामथ प्राप्तोऽगस्त्यः कुम्भोद्भवो मुनिः ।
यात्रार्थं तीर्थमाहात्म्यं ज्ञात्वा स्कन्दप्रसादतः ॥ ४७ ॥
आगत्यतुपुनःसोऽपिकृत्वायात्रांक्रमेणच। यथोक्तेनविधानेनस्नात्वासन्तर्प्यतान्पितॄन्
पूजयित्वायथान्यायंदेवताःसकलाअपि । सर्वाण्यपिचतीर्थानिनमस्कृत्ययथाविधि
कृतकृत्योर्ज्जितानन्दस्तीर्थमाहात्म्यदर्शनात् । अभूदगस्त्योरूपेण पुलकाञ्चितविग्रहः
स त्रिरात्रं स्थितस्तत्र यात्रां कृत्वा यथाविधि ।
स्तुवन्नयोध्यामाहात्म्यं प्रतस्थे मुनिसत्तमः ॥ ५१ ॥
तमायान्तं विलोक्याऽऽशु बहुलानन्दसुन्दरम् ।
कृष्णद्वैपायनो व्यासः पप्रच्छाऽऽनन्दकारणम् ॥ ५२ ॥

व्यास उवाच

कुतः समागतो ब्रह्मन्साम्प्रतं मुनिसत्तमः । परमानन्दसन्दोहः समभूत्साम्प्रतं तव ॥
कस्मादानन्दपोषोऽभूत्तव ब्रह्मन्वदस्व मे । ममापि भवदानन्दात्प्रमोदोहृदि जायते ॥

अगस्त्य उवाच

अहो महदथाश्चर्यं विस्मयो मुनिसत्तम! । दृष्ट्वाप्रभावं मेऽद्याभूदयोध्यायास्तपोधन
तस्मादानन्दसन्दोहः समभून्मम साम्प्रतम् ।
तच्छ्रुत्वागस्त्यवचनं व्यासः प्रोवाच तं मुनिम् ॥ ५६ ॥

व्यास उवाच

भगवन्ब्रूहितत्त्वेनविस्तरात्सरहस्यकम् । अयोध्यायामहापुर्या महिमानंगुणाधिकम्
कः क्रमस्तीर्थयात्रायाः कानि तीर्थानि को विधिः ।
किं फलं स्नानतस्तत्र दानस्य च महामुने! ॥
एतत्सर्वं समाचक्ष्व विस्तराद्वदताम्वर ॥ ५८ ॥

अगस्त्य उवाच

अहो धन्यतमाबुद्धिस्तवजातातपोधन! । दृश्यते येन पृच्छा ते ह्ययोध्यामहिमाश्रिता
अकारो ब्रह्म च प्रोक्तं यकारो विष्णुरुच्यते । धकारो रुद्ररूपश्च अयोध्यानाम राजते

सर्वोपपातकैर्युक्तैर्ब्रह्महत्यादिपातकैः। नायोध्या शक्यतेयस्मात्तामयोध्यांततोविदुः

विष्णोराद्या पुरी येयं क्षितिं न स्पृशति द्विज! ।
विष्णोः सुदर्शने चक्रे स्थिता पुण्यकरी क्षितौ ॥ ६२ ॥
केन वर्णयितुं शक्यो महिमाऽस्यास्तपोधन! ।
यत्र साक्षात्स्वयं देवो विष्णुर्वसति सादरः ॥ ६३ ॥

सहस्रधारामारभ्य योजनं पूर्वतोदिशि। तथैवदिक्प्रतीच्यां वै योजनं समतोऽवधिः
दक्षिणोत्तरभागे तु सरयूतमसावधिः। एतत्क्षेत्रस्य संस्थानं हरेरन्तर्गृहंस्थितम्।
मत्स्याकृतिरियंविप्रपुरीविष्णोरुदीरिता। पश्चिमेतस्यमूर्द्धातुगोप्रतारासिताद्द्विज

पूर्वतः पृष्ठभागो हि दक्षिणोत्तमरमध्यमः ।
तस्यां पुर्य्यां महाभाग! नाम्ना विष्णुर्हरिः स्वयम् ॥
पूर्वं दृष्टप्रभावोऽसौ प्राधान्येन वसत्यपि ॥ ६७ ॥

व्यास उवाच

भगवन्किम्प्रभावोऽसौ योऽयं विष्णुहरिस्त्वया ।
कीर्तितो मुनिशार्दूल प्रसिद्धिं गतवान्कथम् ॥
एतत्सर्वं समाचक्ष्व विस्तरेण ममाऽग्रतः ॥ ६८ ॥

अगस्त्य उवाच

विष्णुशर्मेति विख्यातः पुराऽभूद्ब्राह्मणोत्तमः। वेदवेदाङ्गतत्त्वज्ञोधर्मकर्मसमाश्रितः
योगध्यानरतो नित्यंविष्णुभक्तिपरायणः। सकदाचित्तीर्थयात्रांकुर्वन्वैष्णवसत्तमः

अयोध्यामागतो विष्णुर्विष्णुः साक्षाद्वसेदिति ॥ ७० ॥

चिन्तयन्मनसा वीरस्तपः कर्तुंसमुद्यतः। स वै तत्र तपस्तेपे शाकमूलफलाशनः॥
ग्रीष्मेपञ्चाग्निमध्यस्थो ह्यतपत्स महातपाः। वार्षिकेच निरालम्बोहेमन्ते च सरोवरे

स्नात्वा यथोक्तविधिना कृत्वा विष्णोस्तथाऽर्चनम् ।
वशीकृत्यैन्द्रियग्रामं विशुद्धेनाऽन्तरात्मना ॥ ७३ ॥

मनोविष्णौसमावेश्यविधायप्राणसंयमम्। ॐकारोच्चारणाद्धीमान्हृदिपद्मंविकाशयन्

तन्मध्येरविसोमाग्निमण्डलानियथाविधि। कल्पयित्वाहरिंमूर्तंयस्मिन्देशेसनातनम्
पीताम्बरधरं विष्णुं शङ्खचक्रगदाधरम्। तञ्चपुष्पैःसमभ्यर्च्य मनस्तस्मिन्निवेश्यच
ब्रह्मरूपं हरिंध्यायञ्जपन्वैद्वादशाक्षरम्। वायुभक्षःस्थितस्तत्र विप्रस्त्रीन्वत्सरान्वसन्
ततो द्विजवरो ध्यात्वा स्तुतिश्चक्रे हरेरिमाम्। प्रणिपत्यजगन्नाथं चराचरगुरुंहरिम्

विष्णुशर्माऽथ तुष्टाव नारायणमतन्द्रितः ॥ ७८ ॥

विष्णुशर्मोवाच

प्रसाद भगवन्विष्णो! प्रसीद पुरुषोत्तम! । प्रसीद देवदेवेश! प्रसीद कमलेक्षण! ॥
जयकृष्ण!जयाचिन्त्य!जयविष्णो!जयाव्यय! । जययज्ञपते!नाथ!जयविष्णोपतेविभो
जय पापहरानन्त जय जन्मज्वरापह। नमः कमलनाभाय नमः कमलमालिने ॥ ८१ ॥
नमः सर्वेश भूतेश नमः कैटभसूदन! । नमस्त्रैलोक्यनाथाय जगन्मूल! जगत्पते ॥८२॥
नमो देवाधिदेवाय नमो नारायणाय वै। नमः कृष्णाय रामाय नमश्चक्रायुधाय च ॥

त्वं माता सर्वलोकानां त्वमेव जगतःपिता ।
भयार्त्तानां सुहृन्मित्रं त्वं पिता त्वं पितामहः ॥ ८४ ॥
त्वं हविस्त्वं वषट्कारस्त्वं प्रभुस्त्वं हुताशनः ।
करणं कारणं कर्त्ता त्वमेव परमेश्वरः ॥ ८५ ॥
शङ्खचक्रगदापाणे! मां समुद्धर माधव! ॥ ८६ ॥

प्रसीद मन्दरधर! प्रसीद मधुसूदन! । प्रसीद कमलाकान्त प्रसीद भुवनाधिप! ॥८७॥

अगस्त्य उवाच

इत्येवं स्तुवतस्तस्यमनोभक्तयामहात्मनः। आविर्बभूव विश्वात्मा विष्णुर्गरुडवाहनः
शङ्खचक्रपदापाणिः पाताम्बरधरोऽच्युतः। उवाचस प्रसन्नात्माविष्णुशर्माणमव्ययः

श्रीभगवानुवाच

तुष्टोऽस्मि भवतो वत्स महता तपसाऽधुना ।
स्तोत्रेणानेन सुमते! नष्टपापोऽसिसाम्प्रतम् ॥ ९० ॥

वरम्वरयविप्रेन्द्र। वरदोऽहं तवाऽग्रतः। नाऽतप्ततपसा द्रष्टुं शक्यः केनाऽप्यहं द्विज!

विष्णुशर्म्मोवाच

कृतकृत्योऽस्मि देवेश साम्प्रतं तवदर्शनात् । त्वद्भक्तिमचलामेकां मम देहि जगत्पते

श्रीभगवानुवाच

भक्तिरस्त्वचलामेवैवैष्णवीमुक्तिदायिनी । अत्रैवास्त्वचलामेवै जाह्नवीमुक्तिदायिनी

इदं स्थानं महाभाग! त्वन्नाम्ना ख्यातिमेष्यति ॥ ६४॥

अगस्त्य उवाच

इत्युक्त्वादेवदेवेशश्चक्रेणोत्खायतत्स्थलम् । जलं प्रकटयामास गाङ्गंपातालमण्डलात्

जलेन तेन भगवान्पवित्रेण दयाम्बुधिः । नीरजस्कं भूमितलं क्षणाच्चक्रे कृपावशात्

चक्रतीर्थमिति ख्यातं ततः प्रभृति तद् द्विज! ।

जातं त्रैलोक्यविख्यातमघौघध्वंसकृच्छुभम् ॥ ६७ ॥

तत्र स्नानेन दानेन विष्णुलोकम्व्रजेन्नरः॥ ६८ ॥

ततः स भगवान्भूयोविष्णुशर्माणमच्युतः । कृपया परया युक्त उवाच द्विजवत्सलः

श्रीभगवानुवाच.

त्वन्नामपूर्विकाविप्रमन्मूर्त्तिरिहतिष्ठतु । विष्णुहरीतिविख्याता मुक्तानांमुक्तिदायिनी

अगस्त्य उवाच

इतिश्रुत्वावचोविप्रोवासुदेवस्यबुद्धिमान् । स्वनामपूर्विकांमूर्तिंस्थापयामासचक्रिणः

ततः प्रभृति विप्रेश! शङ्खचक्रगदाधरः । पीतवासाश्चतुर्बाहुर्नाम्नाविष्णुहरिः स्थितः

कार्त्तिकेशुक्लपक्षस्यप्रारम्यदशमीतिथिम् । पूर्णिमामवधिंकृत्वायात्रासाम्वत्सरीभवेत्

चक्रतीर्थेनरः स्नात्वा सर्वपापैः प्रमुच्यते । बहुवर्षसहस्राणि स्वर्गलोके महीयते ॥

पितॄनुद्दिश्य यस्तत्र पिण्डान्निर्वापयिष्यति ।

तृप्तास्तु पितरो यान्ति विष्णुलोकं न संशयः ॥ १०५ ॥

चक्रतीर्थे नरः स्नात्वा दृष्ट्वा विष्णुहरिं विभुम् । सर्वपापक्षयंप्राप्य नाकपृष्ठे महीयते

स्वशक्त्या तत्र दानानि दत्त्वा निष्कल्मषो नरः ।

विष्णुलोके वसेद्धीमान्यावदिन्द्राश्चतुर्दश ॥ १०७ ॥

अन्यदाऽपि नरस्तत्र चक्रतीर्थे जितेन्द्रियः । दृष्ट्वा सकृद्धरिंदेवं सर्वपापैः प्रमुच्यते ॥

इति सकलगुणाब्धिर्ध्येयमूर्तिश्चिदात्मा

हरिरिह परमूर्त्या तस्थिवान्मुक्तिहेतोः ।

तमिह बहुलभक्त्या चक्रतीर्थाभिषेकी

वसति सुकृतिमूर्त्तिर्योऽर्चयेद्विष्णुलोके ॥ १०६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे-

ऽयोध्यामाहात्म्ये विष्णुहरिमाहात्म्यवर्णनंनाम

प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

ब्रह्मकुण्डसहस्रधारातीर्थवर्णनम्

सूत उवाच

अगस्त्यमुनिरित्युक्त्वा चक्रतीर्थाश्रयां कथाम् ।

विभोर्विष्णुहरेश्चापि पुनराह द्विजोत्तमाः ॥ १ ॥

अगस्त्य उवाच

पुरा ब्रह्माजगत्स्रष्टाविज्ञायहरिमच्युतम् । अयोध्यावासिनंदेवंतत्रचक्रेस्थितिंस्वयम्

आगत्यकृतवांस्तत्र यात्रां ब्रह्मायथाविधि । यज्ञश्चविधिवच्चक्रेनानासम्भारसंयुतम्

ततः स कृतवां स्तत्र ब्रह्मालोकपितामहः ।

कुण्डं स्वनाम्ना विपुलं नानादेवसमन्वितम् ॥ ४ ॥

विस्तीर्णजलकल्लोलकलितं कलुषापहम् । कुमुदोत्पलकह्लारपुण्डरीककुलाकुलम् ॥

हंससारसचक्राह्वविहङ्गममनोहरम् । तटान्तविटपोल्लासिपतत्त्रिगणसङ्कुलम् ॥ ६ ॥

तत्र कुण्डेसुराः सर्वेस्नाताःशुद्धिसमन्विताः । बभूवुरद्धा विगतरजस्काविमलत्विषः

तदाश्चर्यं महद्दृष्ट्वा ते सर्वे सहसासुराः । ब्रह्माणम्प्रणिपत्योचुर्भक्त्या प्राञ्जलयस्तदा

देवा ऊचुः

भगवन्ब्रूहि तत्त्वेन माहात्म्यंकमलासन । अस्य कुण्डस्यसकलंखातस्यविमलत्विषः
अत्रस्नानेनसर्वेषामस्माकंविगतं रजः । महदाश्चर्यमेतस्य दृष्ट्वा कुण्डस्यविस्मिताः
सर्वे वयं सुरश्रेष्ठ! कृपया त्वमतो वद ॥ १० ॥

ब्रह्मोवाच

शृण्वन्तु सर्वे त्रिदशाः! सावधानाः सविस्मयाः ।
कुण्डस्यैतस्य माहात्म्यं नानाफलसमन्वितम् ॥ ११ ॥
अत्रस्नानेनविधिवत्पापात्मानोऽपिजन्तवः । विमानंहंससंयुक्तमास्थायरुचिराम्बराः
(अध्यासते) निवसन्ति ब्रह्मलोकं यावदाभूतसम्प्लवम् ॥ १२ ॥
अत्र दानेन होमेन यथाशक्त्या सुरोत्तमाः । तुलाश्वमेधयोःपुण्योप्राप्नुयुर्मुनिसत्तमाः
ममास्मिन्सरसिश्रीमाञ्जायतेस्नानतोनरः । तस्मादत्र विधानेनस्नानंदानंजपादिकम्
सर्वयज्ञसमंस्याद्वैमहापातकनाशनम् । ब्रह्मकुण्डमिति ख्यातिमितोयास्यत्यनुत्तमाम्
अस्मिन्कुण्डेचसान्निध्यंभविष्यतिसदामम । कार्त्तिकेशुक्लपक्षस्यचतुर्दश्यांसुरोत्तमाः
यात्रा भविष्यति सदा सुराः! साम्वत्सरीमम । शुभप्रदा महापापराशिनाशकरीतदा
स्वर्णञ्चैवसदादेयंवासांसिविविधानिच । निजशक्त्याप्रकर्तव्यासुरास्तृप्तिर्द्विजन्मनाम्

अगस्त्य उवाच

इत्युक्त्वा देवदेवोऽयं ब्रह्मा लोकपितामहः । अन्तर्दधे सुरैः सार्द्धं तीर्थं दृष्ट्वा तपोधन!
तदाप्रभृति तत्कुण्डंविख्यातंपरमम्भुवि । चक्रतीर्थाच्चपूर्वस्यांदिशिकुण्डंस्थितंमहत्

सूत उवाच

इत्युक्त्वा स तपोराशिरगस्त्यः कुम्भसम्भवः ।
पुनः पृष्टो मुनिवरो व्यासायाऽवीवदत्कथाम् ॥ २१ ॥

अगस्त्य उवाच

अन्यच्छृणु महाभाग! तीर्थंदुष्कृतिदुर्ल्लभम् । ऋणमोचनसञ्ज्ञन्तु सरयूतीरसङ्गतम्

ब्रह्मकुण्डान्मुनिवर! धनुःसप्तशतेन च । पूर्वोत्तरदिशाभागे संस्थितं सरयूजले ॥२३॥
तत्र पूर्वं मुनिवरो लोमशोनाम नामतः । तीर्थयात्राप्रसङ्गेन स्नानञ्चक्रे विधानतः ॥
ततः स ऋणनिर्मुक्तो बभूव गतकल्मषः । तदाश्चर्यं महद्दृष्ट्वा मुनीन्सानन्दमब्रवीत्
पश्यन्त्वेतस्यमहतोगुणांस्तीर्थवरस्य वै । भुजावूर्ध्वंतथाकृत्वाहर्षेणाऽऽहाश्रुलोचनः

लोमश उवाच

ऋणमोचनसञ्ज्ञन्तु तीर्थमेतदनुत्तमम् । यत्र स्नानेन जन्तूनामृणनिर्यातनम्भवेत् ॥
ऐहिकं पारलौकिक्यं यदृणत्रितयं नृणाम् ।
तत्सर्वं स्नानमात्रेण तीर्थेऽस्मिन्नश्यति क्षणात् ॥ २८ ॥
सर्वतीर्थोत्तमं चैतत्सद्यः प्रत्ययकारकम् । मया चाऽस्य फलं सम्यगनुभूतमृणादिह
तस्मादत्र विधानेनस्नानंदानञ्चशक्तितः । कर्त्तव्यंश्रद्धयायुक्तैःसर्वदाफलकाङ्क्षिभिः
स्नातव्यञ्च सुवर्णञ्च देयं वस्त्रादि शक्तितः ॥ ३१ ॥

अगस्त्य उवाच

इत्युक्त्वा तीर्थमाहात्म्यं लोमशो मुनिसत्तमः ।
अन्तर्दधे मुनिश्रेष्ठः स्तुवंस्तीर्थगुणान्मुदा ॥ ३२ ॥
इत्येतत्कथितं विप्र! ऋणमोचनसञ्ज्ञकम् । यत्रस्नानेनजन्तूनामृणंनश्यतितत्क्षणात्
ऋणमोचनतीर्थन्तु पूर्वतः सरयूजले ॥ ३३ ॥
धनुर्द्विशत्या तीर्थञ्च पापमोचनसञ्ज्ञकम् । सर्वपापविशुद्धात्मा तत्र स्नानेन मानवः ॥
जायते तत्क्षणादेव नाऽत्र कार्या विचारणा ॥ ३४ ॥
मया तत्र मुनिश्रेष्ठ! दृष्टं माहात्म्यमुत्तमम् ॥ ३५ ॥
पाञ्चालदेशसम्भूतो नाम्ना नरहरिर्द्विजः । असत्सङ्गप्रभावेण पापात्मा समजायत ॥
नानाविधानि पापानि ब्रह्महत्यादिकानि च । कृतवान्पापिसङ्गेनत्रयीमार्गविनिन्दकः
स कदाचित्साधुसङ्गात्तीर्थयात्राप्रसङ्गतः । अयोध्यामागतोविप्र!महापातककृद्द्विजः
पापमोचनतीर्थेतुस्नातःसत्सङ्गतोद्विजः । पापराशिर्विनष्टोऽस्यनिष्पापःसमभूत्क्षणात्
दिवः पपात तन्मूर्ध्नि पुष्पवृष्टिर्मुनीश्वर । दिव्यं विमानमारुह्यविष्णुलोकेगतोद्विजः

तद्दृष्ट्वामहदाश्चर्यं मया च द्विजपुङ्गव! । श्रद्धया परयातत्र कृतं स्नानं विशेषतः ॥४१
माघकृष्णचतुर्दश्यां तत्र स्नानं विशेषतः ।
दानञ्च मनुजैः कार्य्यं सर्वपापविशुद्धये ॥ ४२ ॥
अन्यदा तु कृते स्नाने सर्वपापक्षयो भवेत् ॥ ४३ ॥
पापमोचनतीर्थे तुपूर्वन्तु सरयूजले । धनुः शतप्रमाणेन वर्त्तते तीर्थमुत्तमम् ॥ ४४ ॥
सहस्रधारासञ्ज्ञन्तु सर्वकिल्बिषनाशनम् । यस्मिन्रामाज्ञया वीरो लक्ष्मणः परवीरहा
प्राणानुत्सृज्य योगेन ययौ शेषात्मतां पुरा ॥ ४५ ॥
सार्द्धहस्तत्रयेणैव प्रमाणं धनुषो विदुः । चतुर्भिर्हस्तकैः संख्यादण्डइत्यभिधीयते ॥

सूत उवाच

इत्थंतदासमाकर्ण्यकुम्भयोनिमुनेस्तदा । कृष्णद्वैपायनोव्यासःपुनःपप्रच्छकौतुकात्

व्यास उवाच

सहस्रधारामाहात्म्यंविस्तराद्वद सुव्रत! । शृण्वंस्तीर्थस्य माहात्म्यंनतृप्यतिमनोमम

अगस्त्य उवाच

सावधानः शृणु मुने! कथां कथयतो मम । सहस्रधारातीर्थस्य समुत्पत्तिमहोदयात्
पुरा रामो रघुपतिर्देवकार्यं विधायवै । कालेन सह सङ्गम्य मन्त्रं चक्रे नरेश्वरः ॥५०॥
आवां मन्त्रयमाणौ हि यः पश्येदन्तिकागतः ।
मया त्याज्यो भवेत्क्षिप्रमित्थं चक्रे स सम्विदम् ॥ ५१ ॥
तस्मिन्मन्त्रयमाणेहिद्वारेतिष्ठतिलक्ष्मणे । आगतःसतपोराशिर्दुर्वासास्तेजसांनिधिः
आगत्य लक्ष्मणं शीघ्रं प्रीत्योवाच क्षुधाऽऽकुलः ॥ ५३ ॥

दुर्वासा उवाच

सौमित्रे! गच्छ शीघ्रं त्वं रामाग्रे मां निवेदय ।
कार्यार्थिनमिदं वाक्यं नाऽन्यथा कर्तुमर्हसि ॥ ५४ ॥

अगस्त्य उवाच

शापाद्भीतः स सौमित्रिर्द्रुतं गत्वातयोः पुरः । मुनिंनिवेदयामासरामाग्रेदर्शनार्थिनम्

दुर्वाससं तपोराशिमत्रिनन्दनमागतम् ॥ ५५ ॥
रामोऽपि कालमामन्त्र्यप्रस्थाप्यचबहिर्ययौ । दृष्ट्वा मुनिंतंप्रणतःसम्भोज्यप्रभुरादरात्
दुर्वाससं मुनिवरं प्रस्थाप्य स्वयमादरात् ।
सत्यभङ्गभयाद्वीरो लक्ष्मणं त्यक्तवांस्तदा ॥ ५७ ॥
लक्ष्मणोऽपि तदा वीरः कुर्वन्नवितथं वचः । भ्रातुर्ज्येष्ठस्य सुमतिः सरयूतीरमाययौ
तत्र गत्वाऽथ च स्नात्वा ध्यानमास्थाय सत्वरम् ।
चिदात्मनि मनः शान्तं सङ्गम्याऽवस्थितस्तदा ॥ ५९ ॥
ततः प्रादुरभूत्तत्र सहस्रफणमण्डितः । शेषश्चक्षुःश्रवाः श्रेष्ठः क्षितिं भित्त्वासहस्रधा
सुरलोकात्सुरेन्द्रोऽपि समागादमरैः सह ॥ ६० ॥
ततः शेषात्मतां यातं लक्ष्मणं सत्यसङ्गरम् । उवाचमधुरं शक्रःसुराणांतत्रपश्यताम्

इन्द्र उवाच

लक्ष्मणोत्तिष्ठ शीघ्रंत्वमारोह स्वपदं स्वकम् । देवकार्यं कृतं वीर! त्वया रिपुनिषूदन
वैष्णवंपरमंस्थानंप्राप्नुहित्वंसनातनम् । भवन्मूर्तिःसमायातः शेषोऽपिविलसत्फणः
सहस्रधाक्षितिंभित्त्वासहस्रफणमण्डलैः । क्षितेःसहस्रच्छिद्रेषुयस्माद्भित्त्वासमुद्गताः
फणसाहस्रमणिभिर्दग्धाः शेषस्य सुव्रत! । तस्मादेतन्महातीर्थं सरयूतीरगं शुभम्
ख्यातं सहस्रधारेति भविष्यति न संशयः ॥ ६५ ॥
एतत्क्षेत्रप्रमाणं तु धनुषां पञ्चविंशतिः । अत्र स्नानेन दानेन श्राद्धेन श्रद्धयान्वितः ॥
सर्वपापविशुद्धात्मा विष्णुलोकं व्रजेन्नरः ॥ ६६ ॥
अत्र स्नातो नरो धीमाञ्छेषं सम्पूज्य चाऽव्ययम् ।
तीर्थं सम्पूज्य विधिवद्विष्णुलोकमवाप्नुयात् ॥ ६७ ॥
तस्मादत्र प्रकर्तव्यंस्नानं विधिपुरःसरम् । शेषरूपाहिवद्धर्ये याःपूज्याविप्राविशेषतः
स्वर्णं चान्नंचवासांसिदेयानिश्रद्धयान्वितैः । स्नानं दानं हरेः पूजासर्वमक्षयतां व्रजेत्
तस्मादेतन्महातीर्थं सर्वकामफलप्रदम् । क्षितौ भविष्यति सदानात्रकार्याविचारणा
श्रावणे शुक्लपक्षस्य या तिथिः पञ्चमीभवेत् । तस्यामत्रप्रकर्त्तव्योनागानुद्दिश्ययत्नतः

उत्सवो विपुलः सद्भिः शेषपूजापुरःसरम्। उत्सवे तु कृते तत्र तीर्थेमहति मानवैः
सन्तोष्य च द्विजान्भक्त्या नागपूजापुरस्सरम्।
सन्तुष्टाः फणिनः सर्वे पीडयन्ति न मानुषान्॥ ७३॥
वैशाखमासे ये स्नानं कुर्वन्त्यत्र समाहिताः। न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि
तस्मादत्र प्रकर्तव्यं माधवे यत्नतो नरैः। स्नानं दानं हरिःपूज्यो ब्राह्मणाश्च विशेषतः
तीर्थे कृतेऽत्र मनुजैः सर्वकामफलप्रदः॥ ७५॥
विष्णुमुद्दिश्ययोदद्यात्सालङ्कारांपयस्विनीम्।सवत्सामत्रसत्तीर्थेसत्पात्रायद्विजन्मने
तस्य वासो भवेन्नित्यं विष्णुलोके सनातने। अक्षयंस्वर्गमाप्नोतितीर्थस्नानेनमानवः
अत्र पूज्यौ विशेषेण नरैः श्रद्धासमन्वितैः। वैशाखे मास्यलङ्कारैर्वस्त्रैश्चद्विजदम्पती
लक्ष्मीनारायणप्रीत्यै लक्ष्मीप्राप्त्यै विशेषतः।
वैशाखेमासि तीर्थानि पृथिवीसंस्थितानि वै॥ ७६॥
सर्वाण्यपि चसङ्गत्यस्थास्यन्त्यत्रनसंशयः। तस्मादत्रविशेषेणवैशाखेस्नानतोनृणाम्
सर्वतीर्थावगाहस्य भविष्यति फलं महत्॥ ८०॥

अगस्त्य उवाच

इत्युक्त्वा मुनिराजेन्द्रो लक्ष्मणं सुरसङ्गतम्। शेषं संस्थाप्यतत्तीर्थे भूभारहरणक्षमम्
लक्ष्मणं यानमारोप्य प्रतस्थे दिवमादरात्॥ ८१॥
तदाप्रभृति तत्तीर्थंविख्यातिपरमां ययौ। वैशाखेमासितीर्थस्यमाहात्म्यंपरमंस्मृतम्
पञ्चम्यामपि शुक्लायां श्रावणस्य विशेषतः। अन्यदापर्वणि श्रेष्ठंविशेषंस्नानमाचरेत्
सहस्रधारातीर्थे च नरः स्वर्गमवाप्नुयात्॥ ८३॥
विधिवदिह हि श्रीमान्स्नानदानानितीर्थेनरवर! इह शक्त्या यः करोत्यादरेण।
स इह विपुलभोगान्निर्मलात्मा च भक्त्या भजति भुजगशायिश्रीपतेरात्मनैक्यम्॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये
वैष्णवखण्डेऽयोध्यामाहात्म्ये ब्रह्मकुण्डसहस्रधारातीर्थ-
माहात्म्यवर्णनंनाम द्वितीयोऽध्यायः॥ २॥

तृतीयोऽध्यायः

चन्द्रसहस्रव्रतोद्यापनवर्णनम्

सूत उवाच

इति श्रुत्वा वचो धीमानादरात्कुम्भजन्मनः। प्रोवाचमधुरंवाक्यंकृष्णद्वैपायनोमुनिः

व्यास उवाच

भगवन्नद्भुतमिदं तीर्थमाहात्म्यमुत्तमम्। श्रुत्वा त्वत्तो मम मनः परमानन्दमाययौ॥
अन्यत्तीर्थवरं ब्रूहि तत्त्वेन मम शृण्वतः। न तृप्तिरस्ति मनसः शृण्वतो मम सुव्रत!

अगस्त्य उवाच

शृणु विप्र! प्रवक्ष्यामि तीर्थमन्यदनुत्तमम्। स्वर्गद्वारमिति ख्यातं सर्वपापहरं सदा
स्वर्गद्वारस्य माहात्म्यं विस्ताराद्वक्तुमीश्वरः।
नहि कश्चिदतो वत्स! सङ्क्षेपाच्छृणु सुव्रत!॥ ५॥
सहस्रधारामारभ्य पूर्वतः सरयूजले। षट्त्रिंशदधिका प्रोक्ता धनुषां षट्शती मितिः
स्वर्गद्वारस्य विस्तारः पुराणज्ञैर्विशारदैः। स्वर्गद्वारसमं तीर्थं न भूतं न भविष्यति
सत्यंसत्यंपुनः सत्यं नासत्यं ममभाषितम्। स्वर्गद्वारसमंतीर्थंनास्तिब्रह्माण्डगोलके
हित्वा दिव्यानि भौमानि तीर्थानि सकलान्यपि।
प्रातरागत्य तिष्ठन्ति तत्र संश्रित्य सुव्रत!॥ ६॥
तस्मादत्र प्रकर्तव्यं प्रातःस्नानं विशेषतः। सर्वतीर्थावगाहस्य फलमात्मनः ईप्सता
त्यजन्ति प्राणिनः प्राणान्स्वर्गद्वारान्तरे द्विज!।
प्रयान्ति परमं स्थानं विष्णोस्तेनाऽत्र संशयः॥ ११॥
मुक्तिद्वारमिदं पश्यस्वर्गप्राप्तिकरंनृणाम्। स्वर्गद्वारमितिख्यातंतस्मात्तीर्थमनुत्तमम्
स्वर्गद्वारंसुदुष्प्राप्यं देवैरपि न संशयः। यद्यत्कामयते तत्र तत्तदाप्नोति मानवः॥
स्वर्गद्वारे परा सिद्धिः स्वर्गद्वारे परागतिः। जप्तं दत्तं हुतं दृष्टं तप्तस्तप्तंकृतञ्चयत्

ध्यानमध्ययनं सर्वं दानं भवतिचाऽक्षयम् ॥ १४ ॥

जन्मान्तरसहस्रेण यत्पापं पूर्वसञ्चितम् । स्वर्गद्वारप्रविष्टस्य तत्सर्वं व्रजति क्षयम्

ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्रा वै वर्णसङ्कराः ।

कृमिम्लेच्छाश्च ये चाऽन्ये सङ्कीर्णाः पापयोनयः ॥ १६ ॥

कीटाः पिपीलिकाश्चैवयेचान्येमृगपक्षिणः । कालेन निधनं प्राप्ताःस्वर्गद्वारेशृणुद्विज कौमोदकीकराः सर्वे पक्षिणो गरुडध्वजाः । शुभेविष्णुपुरेविष्णुर्जायन्तेतत्रमानवाः

अकामो वा सकामो वा अपि तीर्थगतोऽपि वा ।

स्वर्गद्वारे त्यजन्प्राणान्विष्णुलोके महीयते ॥ १९ ॥

मुनयो देवताः सिद्धाः साध्या यक्षा मरुद्गणाः । यज्ञोपवीतमात्रेणविभागश्चक्रिरेतुये मध्याह्नेऽत्र प्रकुर्वन्तिसान्निध्यंदेवतागणाः । तस्मात्तत्रप्रकुर्वन्तिमध्याह्नेस्नानमादरात् कुर्वन्त्यनशनं ये तु स्वर्गद्वारे जितेन्द्रियाः । प्रयान्ति परमंस्थानंयेचमासोपवासिनः अन्नदानरता ये च रत्नदा भूमिदा नराः । गोवस्त्रदाश्च विप्रेभ्यो यान्ति ते भवनं हरेः यत्र सिद्धा महात्मानोमुनयः पितरस्तथा । स्वर्गंप्रयान्तितेसर्वेस्वर्गद्वारंततःस्मृतम् चतुर्द्धाच तनुं कृत्वादेवदेवो हरिःस्वयम् । अत्र वै रमते नित्यं भ्रातृभिः सह राघवः ब्रह्मलोकं परित्यज्य चतुर्वक्त्रः सनातनः । अत्रैवरमते नित्यं देवैः सह पितामहः ॥

कैलासनिलयावासी शिवस्तत्रैव संस्थितः ॥ २७ ॥

मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्मणः । स्वर्गद्वारंसमासाद्यससर्वोव्रजतिक्षयम् या गतिर्ज्ञानतपसां या गतिर्यज्ञयाजिनाम् । स्वर्गद्वारे मृतानांतु सागतिर्विहिताशुभा ऋषिदेवासुरगणैर्जपहोमपरायणैः । यतिभिर्मोक्षकामैश्च स्वर्गद्वारो निषेव्यते ॥ ३०॥ षष्ठिवर्षसहस्राणि काशीवासेषु यत्फलम् । तत्फलं निमिषार्द्धेन कलौदाशरथींपुरीम् यागतिर्योगयुक्तानांवाराणास्यांतनुत्यजाम् । सा गतिःस्नानमात्रेणसरय्वांहरिवासरे

स्वर्गद्वारे मृतः कश्चिन्नरकं नैव पश्यति ।

केशवानुगृहीता हि सर्वे यान्ति परांगतिम् ॥ ३३ ॥

भूलोके चाऽन्तरिक्षे च दिवि तीर्थानि यानि वै ।

अतीत्य वर्तते तानि तीर्थान्येतद् द्विजोत्तम! ॥ ३४ ॥

विष्णुभक्तिं समासाद्य रमन्ते तु सुनिश्चिताः ।

संहृत्य शक्तितः कामं विषयेषु हि संस्थितम् ॥ ३५ ॥

शक्तितःसर्वतोयुक्त्वाशक्तिस्तपसिसंस्थिता । नतेषांपुनरावृत्तिःकल्पकोटिशतैरपि हन्यमानोऽपियोविद्वान्वसेच्छस्त्रशतैरपि । सयातिपरमं स्थानं यत्र गत्वा नशोचति स्वर्गद्वारे वियुज्येत सयाति परमाङ्गतिम् । उत्तरं दक्षिणंवाऽपिअयनंनविकल्पयेत् सर्वस्तेषां शुभःकालःस्वर्गद्वारंश्रयन्तिये । स्नानमात्रेणपापानिविलयंयान्तिदेहिनाम् यावत्पापानि देहेनयेकुर्वन्ति जनाः क्षितौ । अयोध्या परमं स्थानंतेषामीरितमादरात् ज्येष्ठे मासि सितेपक्षेपञ्चदश्यांविशेषतः । तस्यसाम्वत्सरीयात्रादेवैश्चन्द्रहरेःस्मृता तस्मिन्नुद्यापनं चन्द्रसहस्रं व्रतयोगिभिः । कार्यं प्रयत्नतो विप्र! सर्वयज्ञफलाधिकम्

तस्मिन्कृते महापापक्षयात्स्वर्गो भवेन्नृणाम् ॥ ४३ ॥

श्रीव्यास उवाच

भगवन्ब्रूहि तत्त्वेनतस्यचन्द्रहरेः शुभाम् । उत्पत्तिश्च तथाचन्द्रव्रतस्योद्यापनेविधिम्

अगस्त्य उवाच

अयोध्यानिलयं विष्णुंनत्वा शीतांशुरुत्सुकः ।

आगच्छत्तीर्थमाहात्म्यं साक्षात्कर्तुं सुधानिधिः ॥

अत्राऽऽगत्य च चन्द्रोऽथ तीर्थयात्रां चकार सः ॥ ४५ ॥

क्रमेण विधिपूर्वञ्च नानाश्चर्यसमन्वितः । समाराध्य ततो विष्णुं तपसा दुश्चरेण वै तत्प्रसादं समासाद्य स्वाभिधानपुरस्सरम् । हरिं संस्थापयामासतेनचन्द्रहरिःस्मृतः वासुदेवप्रसादेन तत्स्थानं जातमद्भुतम् । तद्धि गुह्यतमं स्थानं वासुदेवस्य सुव्रत

सर्वेषामेव भूतानां भर्तुर्मोक्षस्य सर्वदा ।

अस्मिन्सिद्धाः सदा विप्र! गोविन्दव्रतमास्थिताः ॥ ४९ ॥

नानालिङ्गधरानित्यं विष्णुलोकाभिकाङ्क्षिणः ।

अभ्यस्यन्ति परं योगं मुक्तात्मानो जितेन्द्रियाः ॥ ५० ॥

यथाधर्ममवाप्नोति अन्यत्र न तथा क्वचित्। दानं व्रतं तथा होमःसर्वमक्षयतां व्रजेत्
सर्वकामफलप्राप्तिर्जायते प्राणिनां सदा। तस्मादत्र विधातव्यंप्राणिभिर्यत्नतःक्रमात्
दानादिकं विप्रपूजा दम्पत्योश्च विशेषतः ॥ ५२ ॥
सर्वयज्ञाधिकफलं सर्वतीर्थावगाहनम्। सर्वदेवावलोकस्य यत्पुण्यं जायते नृणाम् ॥
तत्सर्वं जायते पुण्यं प्राणिनामस्य दर्शनात्। तस्मादेतन्महाक्षेत्रं पुराणादिषुगीयते
उद्यापनविधिश्चात्र नृभिर्द्विजपुरस्सरम्। अग्रे चन्द्रहरेश्चन्द्रसहस्रव्रतसञ्ज्ञकः ॥५५॥
गतेवर्षद्वये सार्द्धे पञ्चपक्षे दिनद्वये। दिवसस्याऽष्टमे भागे पतत्येकोऽधिमासकः ॥
ऽप्यधिके वा अशीत्यब्दे चतुर्मासयुते ततः। भवेच्चन्द्रसहस्रं तु तावज्जीवति योनरः
उद्यापनं प्रकर्त्तव्यं तेन यात्रा प्रयत्नतः ॥ ५७ ॥
यत्पुण्यं परमं प्रोक्तं सततं यज्ञयाजिनाम्। सत्यवादिषु यत्पुण्यं यत्पुण्यंहेमदायिनि
तत्पुण्यं लभते विप्र! सहस्राब्दस्य जीविभिः ॥ ५८ ॥
सर्वसौख्यप्रदं तादृक्पुण्यव्रतमिहोच्यते ॥ ५६ ॥
चतुर्दश्यां शुचिः स्नात्वा दन्तधावनपूर्वकम्। चरितब्रह्मचर्य्यश्च जितवाक्कायमानसः
पौर्णमास्यां तथा कृत्वा चन्द्रपूजां च कारयेत् ॥ ६० ॥
पूर्वञ्च मातरः पूज्या गौर्यादिकक्रमेण च। ऋत्विजः पूजयेद्भक्त्यावृद्धिश्राद्धपुरस्सरम्
प्रयतैः प्रतिमा कार्या चन्द्रमण्डलसन्निभा। सहस्रसङ्ख्या ह्यथवातदर्द्धं वातदर्द्धकम्
निजवित्तानुमानेन तदर्द्धेन तदर्द्धिकम् ॥ ६२ ॥
ततः श्रद्धानुमानाद्वा कार्या वित्तानुमानतः। अथवा षोडश शुभा विधातव्याःप्रयत्नतः
चन्द्रपूजां ततः कुर्यादागमोक्तविधानतः। माषैः षोडशभिः कार्याप्रत्येकंप्रतिमाशुभा
सोममन्त्रेण होमस्तु कार्योवित्तानुमानतः। प्रतिमास्थापनंकुर्यात्सोममन्त्रमुदीरयेत्
सोमोत्पत्तिं सोमसूक्तं पाठयेच्च प्रयत्नतः। चन्द्रपूजांततः कुर्यादागमोक्तविधानतः ॥
चन्द्रन्यासं कलान्यासंकारयेन्मण्डलेजलम्। एकादशेन्द्रियन्यासंतथैवविधिपूर्वकम्
चन्द्रबिम्बनिभं कार्य्यंमण्डलंशुभतण्डुलैः। मध्येचकलशःस्थाप्योगव्येनपयसाप्लुतः
चतुरस्रेषुसम्पूर्णान्कलशान्स्थापयेद्बहिः। मण्डले चन्द्रपूजाचकर्तव्यानामभिःक्रमात्

हिमांशवे नमश्चैव सोमचन्द्राय वै नमः। चन्द्राय विधवे नित्यं नमः कुमुदबन्धवे ॥
सुधांशवे च सोमाय ओषधीशाय वै नमः। नमोऽब्जायमृगाङ्कायकलानांनिधयेनमः
नमो नक्षत्रनाथाय शर्वरीपतये नमः। जैवातृकाय सततं द्विजराजाय वै नमः ॥ ७२ ॥
एवं षोडशभिश्चन्द्रः स्तोतव्यो नामभिः क्रमात् ॥ ७३ ॥
ततो वै प्रयतो दद्याद्विधिवन्मन्त्रपूर्वकम्। शङ्खतोयं समादाय सपुष्पफलचन्दनम् ॥
नमस्तेमासमासान्ते जायमानःपुनःपुनः। गृहाणार्घ्यंशशाङ्क! त्वं रोहिण्यासहितोमम
एवं सम्पूज्य विधिवच्छशिनं प्रणतोभवेत्। षोडशान्येचकलशादुग्धपूर्णाःसरत्नकाः
सवस्त्राच्छादनाः शान्त्यै दातव्यास्ते द्विजन्मने।
अभिषेकं ततः कुर्यात्पायसेन जलेन तु ॥ ७७ ॥
ऋत्विजां मनसस्तुष्टिः कार्या वित्तानुमानतः। ब्राह्मणंभोजयेतत्र सकुटुम्बंविशेषतः
पूजनीयौप्रयत्नेन वस्त्रैश्च द्विजदम्पती। कर्तव्यञ्च ततो भूरिदक्षिणादानमुत्तमम् ॥
प्रतिमाश्च प्रदातव्या द्विजेभ्यो धेनुपूर्विकाः। सुवर्णं रजतं वस्त्रं तथान्नं च विशेषतः
दातव्यं चन्द्रसुप्रीत्यै हर्षादेवं द्विजन्मने ॥ ८० ॥
उपवासविधानेन दिनशेषं नयेत्सुधीः। अनन्तरे च दिवसे कुर्याद्भगवदर्चनम् ॥
बान्धवैः सह भुञ्जीत नियमञ्च विसर्ज्जयेत् ॥ ८१ ॥
एवञ्च कुरुते चन्द्रसहस्रं व्रतमुत्तमम्। ब्रह्मघ्नोऽपि सुरापोऽपि स्तेयी च गुरुतल्पगः
व्रतेनाऽनेन शुद्धात्मा चन्द्रलोकं व्रजेन्नरः ॥ ८२ ॥
यादृशश्च भवेद्विप्र! प्रियो नारायणस्य च। एवं करोति नियतं कृतकृत्यो भवेन्नरः ॥

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यां संहितायांद्वितीये
वैष्णवखण्डेऽयोध्यामाहात्म्ये चन्द्रसहस्रव्रतोद्यापनविधि-
वर्णनं नाम तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

धर्महरिस्वर्णखनिमाहात्म्यवर्णनम्

अगस्त्य उवाच

तस्माच्चन्द्रहरिस्थानादाग्नेय्यां दिशि संस्थितः ।
देवो धर्महरिर्नाम कलिकल्मषनाशकः ॥ १ ॥
वेदवेदाङ्गतत्त्वज्ञः स्वकर्मपरिनिष्ठितः ।
पुरा समागतो धर्मस्तीर्थयात्राचिकीर्षया ॥ २ ॥
आगत्य चचकारोच्चैर्यात्रांतत्राऽऽदरेणसः । दृष्ट्वामाहात्म्यमतुलमयोध्यायाःसविस्मयः
विधाय स्वभुजावूर्ध्वौ विप्रोऽवोचन्मुदान्वितः ।
अहो रम्यमिदं तीर्थमहो माहात्म्यमुत्तमम् ॥ ४ ॥
अयोध्यासदृशी कापि दृश्यते नाऽपरा पुरी ।
या न स्पृशति वसुधां विष्णुचक्रस्थिताऽनिशम् ॥ ५ ॥
यस्यां स्थितो हरिः साक्षा सेयं केनोपमीयते ।
अहो तीर्थानि सर्वाणि विष्णुलोकप्रदानि वै ॥ ६ ॥
अहो विष्णुरहोतीर्थमयोध्याऽहो महापुरी ।
अहो माहात्म्यमतुलं किं न श्लाघ्यमिहास्थितम् ॥७ ॥
इत्युक्त्वा तत्र बहुशो ननर्तप्रमदाकुलः । धर्मोमाहात्म्यमालोक्यअयोध्यायाविशेषतः
तं तथा नर्तमानंवै धर्मं दृष्ट्वा कृपान्वितः । आविर्बभूव भगवान्पीतवासाहरिः स्वयम्
तं प्रणम्य च धर्मोऽथ तुष्टाव हरिमादरात् ॥ ९ ॥

धर्म उवाच

नमः क्षीराब्धिवासाय नमः पर्यङ्कशायिने ।
नमो शङ्करसंस्पृष्टदिव्यपादाय विष्णवे ॥ १० ॥

भक्त्याऽर्चितसुपादाय नमोऽजादिप्रियाय ते । शुभाङ्गाय सुनेत्राय माधवाय नमोनमः
नमोऽरविन्दपादाय पद्मनाभाय वै नमः । नमः क्षीराब्धिकल्लोलस्पृष्टगात्राय शार्ङ्गिणे
ॐनमो योगनिद्राय योगक्षैर्भावितात्मने । तार्क्ष्यासनाय देवाय गोविन्दायनमोनमः
सुकेशाय सुनासाय सुललाटाय चक्रिणे । सुवस्त्राय सुवर्णाय श्रीधराय नमोनमः ॥
सुबाहवे नमस्तुभ्यं चारुजङ्घाय ते नमः । सुवासाय सुदिव्याय सुविद्याय गदाभृते
केशवाय च शान्ताय वामनाय नमोनमः । धर्मप्रियाय देवाय नमस्ते पीतवाससे ॥

अगस्त्य उवाच

इति स्तुतो जगन्नाथो धर्मेण श्रीपतिर्मुदा । उवाच स हृषीकेशः प्रीतो धर्ममुदारधीः

श्रीभगवानुवाच

तुष्टोऽहं भवतो धर्म! स्तोत्रेणानेन सुव्रत! । वरम्वरय धर्मज्ञ! यस्तेस्यान्मनसः प्रियः
स्तोत्रेणानेन यः स्तौति मानवो मामतन्द्रितः ।
सर्वान्कामान्वाप्नोति पूजितः श्रीयुतःसदा ॥ १९ ॥

धर्म उवाच

यदि तुष्टोऽसि भगवन्देवदेव! जगत्पते! । त्वामहंस्थापयाम्यत्र निजनाम्नाजगद्गुरो

अगस्त्य उवाच

एवमस्त्विति सम्प्रोच्याऽभवद्धर्महरिर्विभुः । स्मरणादेव मुच्येत नरो धर्महरेर्विभोः
सरयूसलिले स्नात्वा सुचिन्ताकुलमानसः । देवं धर्महरिं पश्येत्सर्वपापैः प्रमुच्यते ॥
अत्र दानं तथा होमं जपोब्राह्मणभोजनम् । सर्वमक्षयतांयातिविष्णुलोकेनिवासकृत्
अज्ञानाज्ज्ञानतो वाऽपि यत्किञ्चिद्दुष्कृतम्भवेत् ।
प्रायश्चित्तं विधातव्यं तन्नाशाय प्रयत्नतः ॥ २४ ॥
प्रायश्चित्तेन विधिना पापं तस्य प्रणश्यति । तस्मादत्र प्रकर्त्तव्यंप्रायश्चित्तंविधानतः
अज्ञानाज्ज्ञानतोवापिराजादेर्निग्रहात्तथा । नित्यकर्मनिवृत्तिःस्याद्यस्यपुंसोऽवशात्मनः
तेनाऽप्यत्र विधातव्यं प्रायश्चित्तं प्रयत्नतः ॥ २६ ॥
अत्र साक्षात्स्वयं देवो विष्णुर्वसति सादरः ।

तस्माद्वर्णयितुं शक्यो महिमा न हि मानवैः ॥ २७ ॥

आषाढे शुक्लपक्षस्यएकादश्यांद्विजोत्तम! । तस्यसाम्वत्सरीयात्राकर्तव्यातुविधानतः

स्वर्गद्वारे नरःस्नात्वा दृष्ट्वा धर्महरिंविभुम् । सर्वपापविशुद्धात्माविष्णुलोकेवसेत्सदा

तस्माद्दक्षिणदिग्भागे स्वर्णस्य खनिरुत्तमा । यत्रचक्रेस्वर्णवृष्टिं कुबेरो रघुजाद्भयात्

व्यास उवाच

भगवन्ब्रूहि तत्त्वज्ञ! स्वर्णवृष्टिरभूत्कथम् । कुबेरस्य कथं भीतिरुत्पन्ना रघुभूपतेः॥

एतत्सर्वं समाचक्ष्व विस्तरान्मम सुव्रत! । श्रुत्वा कथारहस्यानिनतृप्यतिमनो मम

अगस्त्य उवाच

शृणु विप्र! प्रवक्ष्यामि स्वर्णस्योत्पत्तिमुत्तमाम् ।

यस्य श्रवणतो नृणां जायते विस्मयो महान् ॥ ३३ ॥

आसीत्पुरा रघुपतिरिक्ष्वाकुकुलवर्द्धनः । रघुर्निजभुजोदारवीर्यशासितभूतलः ॥ ३४

प्रतापतापितारातिवर्गव्याख्यातसद्यशाः । प्रजाः पालयता सम्यक्तेन नीतिमता सता

यशःपूरेण संलिप्ता दिशोदश सितत्विषा । स चक्रे प्रौढविभवसाधनांविजयक्रमात्

नानादेशान्समाक्रम्य चतुरङ्गबलान्वितः । भूतानि वशमानीय वसु जग्राह दण्डतः॥

उत्कृष्टान्नृपतीन्वीरो दण्डयित्वा बलाधिकान् ।

रत्नानि विविधान्याशु जग्राहाऽतिबलस्तदा ॥ ३८ ॥

स विजित्य दिशः सर्वा गृहीत्वा रत्नसञ्चयम् ।

अयोध्यामागतो राजा राजधानीञ्च तां शुभाम् ॥ ३९ ॥

तत्रागत्यचकाकुत्स्थोयज्ञायोत्सुकमानसः । चकारनिर्मलांबुद्धिंनिजवंशोचितक्रियाम्

वसिष्ठं मुनिमाज्ञाय वामदेवं च कश्यपम् ॥ ४१ ॥

अन्यानपि मुनिश्रेष्ठान्नानातीर्थसमाश्रितान् । समानयद्विनीतेन द्विजवर्येण भूपतिः॥

दृष्ट्वास्थितान्सतान्सर्वान्प्रदीप्तानिवपावकान् । तानागतान्विदित्वाऽथरघुःपरपुरञ्जयः

निश्चक्राम यथान्यायं स्वयमेव महायशाः ॥ ४३ ॥

ततो विनीतवत्सर्वान्काकुत्स्थो द्विजसत्तमान् ।

उवाच धर्मयुक्तं च वचनं यज्ञसिद्धये ॥ ४४ ॥

रघुरुवाच

मुनयः सर्व एवैते यूयं शृणुत मद्वचः । यज्ञं विधातुमिच्छामि तत्राज्ञां दातुमर्हथ ॥

साम्प्रतं मामको यज्ञोयुक्तःस्यान्मुनिसत्तमाः । एतद्विचार्यतत्त्वेन ब्रूत यूयंमुनीश्वराः

मुनय ऊचुः

राजन्विश्वजिदाख्यातोयज्ञानांयज्ञउत्तमः । साम्प्रतंकुरु तं यत्नान्माविलम्बंवृथाकृथाः

अगस्त्य उवाच

नृपश्चक्रे ततो यज्ञं विश्वदिग्जयसञ्ज्ञितम् । नानासम्भारमधुरं कृतसर्वस्वदक्षिणम्

नानाविधेन दानेन मुनिसन्तोषहर्षकृत् । सर्वस्वमेव प्रददौ द्विजेभ्यो बहुमानतः ॥

तेषु विश्वेषु यातेषु पूजितेषु गृहान्स्वकान् । बन्धुष्वपि च तुष्टेषु मुनिषु प्रणतेषु च

तेन यज्ञेन विधिवद्विहितेन नरेश्वरः । शुशुभे शोभनाचारः स्वर्गे देवेन्द्रवत्क्षणात् ॥

तत्रान्तरे समभ्यायान्मुनिर्यमवताम्वरः । विश्वामित्रमुनेरन्तेवासीकौत्सइतिस्मृतः

दक्षिणार्थं गुरोर्द्धीमान्पावितुं तं नरेश्वरम् । चतुर्दशसुवर्णानां कोटीराहर सत्वरम्

मह्यं दक्षिणेति गुरुणा निर्बन्धाद्याचितो रुषा ।

आगतः स मुनिः कौत्सस्ततो याचितुमादरात् ॥ ५३॥

रघुं भूपालतिलकं दत्तसर्वस्वदक्षिणम् ॥ ५४ ॥

तमागतमभिप्रेत्य रघुरादरतस्तदा । उत्थाय पूजयामास विधिवत्स परन्तपः ॥

सपर्य्यासीत्तस्य सर्वा मृत्पात्रविहितक्रिया ॥ ५५ ॥

पूजा सम्भारमालोक्य तादृशं तं मुनीश्वरः ।

विस्मितोऽभून्निरानन्दो दक्षिणाऽऽशां परित्यजन् ॥

उवाच मधुरं वाक्यं वाक्यज्ञानविशारदः ॥ ५६ ॥

कौत्स उवाच

राजन्नभ्युदयस्तेऽतु गच्छाम्यन्यत्र साम्प्रतम् ॥ ५७ ॥

गुर्वर्थाहरणायैवदत्तसर्वस्वदक्षिणम् । त्वां न याचे धनाभावादतोऽन्यत्रव्रजाम्यहम्

अगस्त्य उवाच

इत्युक्तस्तेन मुनिना रघुः परपुरञ्जयः। क्षणं ध्यात्वाऽब्रवीदेनं विनयाद्विहिताञ्जलिः ॥

रघुरुवाच

भगवंस्तिष्ठ मे हर्म्ये दिनमेकं मुनिव्रत! । यावद्यतिष्ये भगवन्भवदर्थार्थमुच्चकैः ॥६०

अगस्त्य उवाच

इत्युक्त्वापरमोदारवचो मुनिमुदारधीः ।प्रतस्थे च रघुस्तत्र कुबेरविजिगीषया ॥६१

तमायान्तं कुबेरोऽथ विज्ञाप्य वचनोदितैः । प्रसन्नमनसंचक्रेवृष्टिं स्वर्णस्य चाक्षयाम्

स्वर्णवृष्टिरभूद्यत्र सास्वर्णखनिरुत्तमा । स मुनिं दर्शयामास खनिं तेन निवेदिताम् ॥

तस्मै समर्पयामास तांरघुःखनिमुत्तमाम् । मुनीन्द्रोऽपिगृहीत्वाशुततोगुर्वर्थमादरात्

राज्ञेनिवेदयामाससर्वमन्यद्गुणाधिकः । वरानथ ददौ तुष्टः कौत्सो मतिमताम्वरः ॥

कौत्स उवाच

राजल्लँभस्वसत्पुत्रं निजवंशगुणान्वितम् । इयंस्वर्ण खनिस्तूर्णं मनोऽभीष्टफलप्रदा

भूयादत्र परं तीर्थं सर्वपापहरं सदा । अत्र स्नानेन दानेन दानेन नृणांलक्ष्मीःप्रजायते

वैशाखेशुक्लद्वादश्यांयात्रासासांवत्सरीस्मृता । नानाभीष्टफलप्राप्तिर्भूयान्मद्वचसानृणाम्

अगस्त्य उवाच

इति दत्त्वा वरान्राज्ञेकौत्सः सन्तुष्टमानसः । प्रतस्थे निजकार्यार्थे गुरोराश्रममुत्सुकः

राज्ञः सकृतकृत्योऽथशेषंसङ्गृह्यतद्धनम् । द्विजेभ्योविधिवद्दत्त्वापालयामासवैप्रजाः

एवं स्वर्णखनेर्जातं माहात्म्यञ्च मुनीश्वरात् ॥ ७१ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये-
वैष्णवखण्डेऽयोध्यामाहात्म्ये धर्महरिस्वर्णखनिमाहात्म्य-
वर्णनंनाम चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

सकौत्सवृत्तवर्णनंतिलोदकीमाहात्म्यकथनम्

व्यास उवाच

भगवन्ब्रूहितत्त्वेनकथंनिर्बन्धतोमुनिः । विश्वामित्रोनिजंशिष्यंकौत्संक्रोधेनताद्दशम्

दुष्प्राप्यमर्थं यत्नेन बहु प्रार्थितवांस्तदा । एतत्सर्वञ्च कथय मयि यद्यस्ति ते कृपा

अगस्त्य उवाच

शृणु द्विजकथामेतांसावधानेन्द्रियःस्वयम् । विश्वामित्रोमुनिश्रेष्ठःसदिव्यज्ञानलोचनः

निजाश्रमे तपो दुर्गञ्चकार प्रयतो व्रती । एकदा तमथो द्रष्टुं दुर्वासा मुनिरागतः ॥

आगत्य च क्षुधाक्रान्त उच्चैः प्रोवाच स द्विजः ।
भोजनं दीयतां मह्यं क्षुधापीडितचेतसे ।
पायसं शुचि चोष्णञ्च शीघ्रं क्षुधार्त्तिने द्विज! ॥ ५ ॥

इतिश्रुत्वावचःक्षिप्रंविश्वामित्रःप्रयत्नतः । स्थाल्यांपायसमादायतंसमर्प्यततःस्वयम्

तदादायोत्थितं दृष्ट्वा दुर्वासास्तं विलोकयन् । उवाच मधुरं वाक्यंमुनिलक्षणतत्परः

क्षणं सहस्व विप्रेन्द्र! यावत्स्नात्वा व्रजाम्यहम् ।
तिष्ठ तिष्ठक्षणं तिष्ठ आगच्छाम्येष साम्प्रतम् ॥ ८ ॥
इत्युक्त्वा स जगामैव दुर्वासाः स्वाश्रमं तदा ॥ ९ ॥
विश्वामित्रस्तपोनिष्ठस्तदा सानुरिवाऽचलः ।
दिव्यं वर्षसहस्रं स तस्थौ स्थिरमतिस्तदा ॥ १० ॥

तस्य शुश्रूषणपरो मुनिः कौत्सो यतव्रतः । बभूव परमोदारमतिर्विगतमत्सरः ॥११

पुनरागत्यस मुनिर्दुर्वासा गतकल्मषः । भुक्त्वा च पायसं सद्यःसजगामनिजाश्रमम्

तस्मिन्गतेमुनिवरेविश्वामित्रस्तपोनिधिः । कौत्संविद्यावतांश्रेष्ठंविससर्जगृहान्प्रति

स विसृष्टो गुरुं प्राह दक्षिणा प्राार्थ्यतामिति ।

विश्वामित्रस्तु तं प्राह त्वं किं दास्यसि दक्षिणाम्
दक्षिणा तव शुश्रूषा गृहं व्रज यतव्रतः ॥ १४ ॥

पुनः पुनर्गुरुं प्राहशिष्यो निर्बन्धवान्यदा। तदा गुरुर्गुरुक्रुद्धः शिष्यंप्राह चनिष्ठुरम्
सुवर्णस्य सुवर्णस्य चतुर्दश समाहर। कोटीर्मे दक्षिणाविप्र पश्चाद्गच्छ गृहम्प्रति

इत्युक्तो गुरुणा कौत्सो विचार्य समुपागतम्।
काकुत्स्थं दिग्विजेतारं ययाचे गुरुदक्षिणाम् ॥ १७ ॥

इत्युक्तं ते मुनिवर त्वया पृष्टं हि यत्पुनः। अतोऽन्यच्छृणुतेवच्मितीर्थकारणमुत्तमम्

तस्माद्दक्षिणदिग्भागे सम्भेदःसिद्धसेवितः।
तिलोदकीसरय्वोश्चसङ्गत्या भुवि संश्रुतः

तत्र स्नात्वामहाभागभवन्तिविरजानराः। दशानामश्वमेधानांकृतानांयत्फलंफलंलभेत्
तदाप्नोति स धर्मात्मा तत्र स्नात्वा यतव्रतः ॥ २० ॥

स्वर्णादिकञ्च यो दद्याद्ब्राह्मणे वेदपारगे। शुभांगतिमवाप्नोति अग्निवच्चैव दीप्यते

तिलोदकी सरय्वोश्च सङ्गमे लोकविश्रुते।
दत्त्वान्नञ्च विधानेन न स भूयोऽभिजायते

उपवासत्रयः कृत्वा विप्रान्सन्तर्पयेन्नरः। सौत्रामणेश्च यज्ञस्य फलमाप्नोति मानवः
एकाहारस्तु यस्तिष्ठेन्मासं तत्र यतव्रतः। यावज्जीवकृतं पापं सहसा तस्य नश्यति
नभस्यकृष्णामावस्यांयात्रासाम्वत्सरीभवेत्। रामेणनिर्मितापूर्वंनदीसिन्धुरिवापरा
सिन्धुजानांतुरङ्गाणांजलपानायसुव्रत!। तिलवच्छ्यामुदकं यतस्तस्यां सदाबभौ

तिलोदकीति विख्याता पुण्यतोया सदा नदी।
सङ्गमादन्यतो यस्यां तिलोदक्यां शुचिव्रतः
स्नातो विमुच्यते पापैः सप्तजन्मार्जितैरपि ॥ २७ ॥

तस्मात्तिलोदकीस्नानं सर्वपापहरं मुने!।
कर्त्तव्यं सुप्रयत्नेन प्राणिभिर्धर्मकाङ्क्षिभिः
स्नानं दानं व्रतं होमं सर्वमक्षयतां व्रजेत् ॥ २८ ॥

इति विविधविधानैस्तीर्थयात्रां क्रमेण प्रथितगुणविकासः प्राप्तपुण्यो विधाय
हरिमुपहृतभावः पूजयन्सर्वतीर्थं व्रजति परमधाम न्यस्तपापः कथञ्चित् ॥ २६

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीयेवैष्णव
खण्डेऽयोध्यामाहात्म्ये तिलोदकीप्रभाववर्णनंनाम
पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

स्वर्गद्वारगोप्रतारतीर्थमाहात्म्यवर्णनम्

अगस्त्य उवाच

तस्मात्सङ्गमतोविप्रपश्चिमेदिक्तटेस्थितम्। सीताकुण्डमितिख्यातंसर्वकामफलप्रदम्
यत्रस्नात्वानरो विप्र सर्वपापैःप्रमुच्यते। सीतया किलतत्कुण्डंस्वयमेवविनिर्मितम्
रामेण वरदानाच्च महाफलनिधिकृतम् ॥ २ ॥

श्रीराम उवाच

शृणु सीते! प्रवक्ष्यामि माहात्म्यं भुवि यादृशम्।
त्वत्कुण्डस्याऽस्य सुभगे त्वत्प्रीत्या कथयाम्यहम् ॥ ३ ॥

अत्र स्नानञ्च दानञ्च जपो होमस्तपोऽथवा। सर्वमक्षयतां याति विधानेनशुचिस्मते
मार्गकृष्णचतुर्दश्यां तत्र स्नानंविशेषतः। सर्वपापहरं देवि! सर्वदास्नायिनांनृणाम्
इति रामो वरं प्रादात्सीतायै च प्रजाप्रियः। तदाप्रभृति सर्वत्र तत्तीर्थे भुविवर्त्तते

सीताकुण्डमिति ख्यातं जनानां परमाद्भुतम्।
तस्मिंस्तीर्थे नरः स्नात्वा नूनं राममवाप्नुयात् ॥ ७ ॥

तत्र स्नानेन दानेन तपसा च विशेषतः। गन्धैर्माल्यैर्धूपदापैर्नानाविभवविस्तरैः ॥
रामं सम्पूज्य सीताञ्च मुक्तः स्यान्नात्र संशयः ॥ ८ ॥

मार्गे मासि च स्नातव्यं गर्भवासो न जायते ।
अन्यदाऽपि नरः स्नात्वा विष्णुलोकं सगच्छति ॥ ९ ॥
विभोर्विष्णुहरेर्विप्र! रम्ये पश्चिमदिक्तटे । देवश्चक्रहरिर्नाम सर्वाभीष्टफलप्रदः ॥१०
तस्य चक्रहरेर्विप्र महिमा न हि मानवैः । शक्यो वर्णयितुंधीरैरपि बुद्धिमताम्वरैः
ततः पश्चिमदिग्भागे नाम्ना पुण्यं हरिस्मृति । विष्णोरायतनंख्यातंपरमार्थफलप्रदम्
यस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते ॥ १२ ॥
तयोर्दर्शनतो यान्ति तेषां पापानिदेहिनाम् । तानिपापानियावन्ति कुर्वतेभुवियेनराः
पुरा देवासुरे जाते सङ्ग्रामे भृशदारुणे । दैत्यैर्वरमदोत्सिक्तैर्देवायुधि पराजिताः ॥
तेषां पलायमानानां देवानामग्रणीर्हरः । संस्तभ्यचैवतान्सर्वान्पुरस्कृत्याम्बुजासनम्
क्षीरोदशायिनं विष्णुं शेषपर्य्यङ्कशायिनम् ।
लक्ष्म्योपविष्टं पार्श्वे च चरणाम्बुजहस्तया ॥ १६ ॥
नारदाद्यैर्मुनिवरैरुद्गीतगुणगौरवम् । गरुडेन पुरःस्थेनानिशमञ्जलिना स्तुतम् ॥१७॥
क्षीराब्धिजलकल्लोलमदबिन्दङ्कितांम्बरम् । तारकोत्करविस्फारतारहारविराजितम्
पीताम्बरमतिस्मेरविकाशद्भावभावितम् ।
बिभ्रतं कुण्डलं स्थूलं कर्णाभ्यां मौक्तिकोज्ज्वलम् ॥ १९ ॥
रत्नवल्लीमिव स्वच्छां श्वेतद्वीपनिवासिनीम् ।
किरीटं पद्मरागाणां वलयं दधतं परम् ॥ २० ॥
मित्रस्य राहुवित्रासनिवर्त्तनमिवाऽपरम् । सकौस्तुभप्रभाचक्रं बिभ्राणम्प्रवलारुणम्
पराञ्चतुर्मुखोत्पत्तिकल्पसंकल्पनामिव । शरणंस जगामाऽऽशुविनीतात्मास्तुवन्निति
तस्मिन्नवसरेशम्भुःसर्वदेवगणैःसह । तुष्टाव प्रयतोभूत्वा विष्णुं जिष्णुंसुरद्विषाम्

ईश्वर उवाच

संसारार्णवसंतारसुपर्णमुखदायिने । मोहतीव्रतमोहारिचन्द्राय हरये नमः ॥ २४ ॥
स्फुरत्सम्विन्मणिशिखां चित्तसङ्गतिचन्द्रिकाम् ।
प्रपद्ये भगवद्भक्तिमानसोद्यानवाहिनीम् ॥ २५ ॥

हेलोल्लसत्समुत्साहशक्तिव्याप्तजगत्त्रयम् । यापूर्वकोटिर्भावानांसत्वानांवैष्णवीतिवा
पवनान्दोलिताम्भोजदलपर्यान्तवर्त्तिनाम् । पततामिवजन्तूनांस्थैर्यमेका हरिस्मृतिः
नमः सूर्य्यात्मने तुभ्यं साम्वित्किरणमालिने ।
हृत्कुशेशयकोपश्रीसमुन्मेषविधायिने ॥ २८ ॥
नमस्तस्मै यमवते योगिनांगतये सदा । परमेशाय वै पारे सहसां तमसां तथा ॥
यज्ञाय भुक्तहविष ऋग्यजुःसामरूपिणे । नमः सरस्वतीगीतदिव्यसद्गुणशालिने ॥
शान्ताय धर्मनिधये क्षेत्रज्ञायाऽमृतात्मने । शिष्ययोगप्रतिष्ठाय नमो जीवैकहेतवे ॥
घोराय मायाविधये सहस्रशिरसे नमः ॥ ३१ ॥
योगनिद्रात्मनेनाभिपद्मोद्भूतजगत्सृजे । नमः सलिलरूपाय कारणाय जगत्स्थितेः
कार्यमेयाय वलिने जीवाय परमात्मने । गोप्त्रे प्राणाय भूतानां समो विश्वायवेधसे
दृप्ताय सिंहवपुषे दैत्यसंहारकारिणे । वीर्यायाऽनन्तमनसे जगद्भावभृते नमः ॥ ३४ ॥
संसारकारणाज्ञानमहासन्तमसच्छिदे । अचिन्त्यधाम्ने गुह्याय रुद्रायात्युद्धिजेनमः ॥
शान्ताय शान्तकल्लोलकैवल्यपददायिने । सर्वभावातिरिक्ताय नमः सर्वमयात्मने ॥
इन्दीवरदलश्यामं स्फूर्जत्किञ्जल्कविभ्रमम् ।
बिभ्राणं कौस्तुभं विष्णुं नौमि नेत्ररसायनम् ॥ ३७ ॥

अगस्त्य उवाच

इति स्तुतः प्रसन्नात्मा वरदो गरुडध्वजः । ववर्ष दृष्टिसुधया सर्वान्देवान्कृपान्वितः
उवाच मधुरं वाक्यं प्रश्रयावनतान्सुरान् ॥ ३८ ॥

श्रीभगवानुवाच

जानामि विबुधाः सर्वमभिप्रायं समाधितः । दैतेयैर्विक्रमाक्रान्तं पदं समरदर्पितैः ॥
सबलैर्बलहीनानां प्रतापो विजितःपरैः । साम्प्रतं तु विधास्यामितपोयुष्मद्बलायवै
अयोध्यानगरेगत्वा करिष्येतपउत्तमम् । गुप्तो भूत्वा भवत्तेजोविवृद्ध्यैदैत्यशान्तये
भवन्तोऽपि तपस्तीव्रं कुर्वन्त्वमलमानसाः ।
अयोध्यां प्राप्यतांदेवादैत्यनाशाय सत्वरम्

अगस्त्य उवाच

इत्युक्त्वाऽन्तर्दधे देवान्देवो गरुडवाहनः । अयोध्यामागतः क्षिप्रञ्चकार तप उत्तमम्
गुप्तो भूत्वा यदा विद्वन्सुरतेजोऽभिवृद्धये । तेन गुप्तहरिर्नाम देवो विख्यातिमागतः
आगतस्य हरेः पूर्वं यत्र हस्ततलाच्च्युतम् ।
सुदर्शनाख्यं तच्चक्रं तेन चक्रहरिः स्मृतः ॥ ४५ ॥
तयोर्दर्शनमात्रेण सर्वपापैः प्रमुच्यते । हरेस्तेन प्रभावेण देवाः प्रबलतेजसा ॥ ४६ ॥
जित्वा दैत्यागणैः सर्वान्सम्प्राप्य स्वपदान्यथ । रेजिरेविपुलानन्दैरसुरानार्दयंस्ततः
ततः सर्वे समेत्याशुबृहस्पतिपुरस्सराः । देवाः सर्वेऽनमन्मौलिमालार्चितपदाम्बुजम्
हरिं द्रष्टुमथागच्छन्नयोध्यायां समुत्सुकाः ॥ ४८ ॥
आगत्य चततःश्रुत्वानानाविधगुणादरम् । भावैःपुण्यैःसमभ्यर्च्यनत्वाप्राञ्जलयस्तदा
हरिमेकाग्रमनसा ध्यायन्तो ध्याननिष्ठिताः ॥ ४६ ॥
तानागतान्समालोक्यपदभक्त्याकृतानतीन् । प्रसन्नः प्राहविश्वात्मापीतवासाजनार्दनः

श्रीभगवानुवाच

भोभोदेवाभवन्तश्चचिराद्विष्ट्यायसंगताः । अधुनाभवतामिच्छांकांकरोमिसुराअहम्
तद्ब्रूत त्वरिता मह्यं किं विलम्बेन निर्भयाः ॥ ५१ ॥

देवा ऊचुः

भगवन्देवदेवेश! त्वया सम्प्रति सर्वशः । सर्वं समभवत्कार्यं निष्पन्नं वै जगत्पते! ॥
तथापिसर्वदाभाव्यं नित्यंदेवत्वयाविभो! । अस्मद्रक्षार्थमत्रैव विजितेन्द्रियवर्त्मना
एवमेव सदा कार्यं शत्रुपक्षविनाशनम् ॥ ५४ ॥

श्रीभगवानुवाच

एवमेतत्करिष्यामि भवतामरिसञ्जयम् । श्रीमतां तेजसो वृद्धिं करिष्यामिसदासुराः
कथयश्च सदा ख्यातिं लोके यास्यति चोत्तमाम् ॥ ५५ ॥
अयं नाम्ना गुप्तहरिर्देवो भुवनविश्रुतः । मदीयं परमं गुह्यं स्थानं ख्यातिं समेष्यति
अत्र यः प्राणिनां श्रेष्ठःपूजायज्ञजपादिकम् । करोतिपरयाभक्त्यासयातिपरमांगतिम्

अत्र यः कुरुतेदानं यथाशक्त्या जितेन्द्रियः । स स्वर्गमतुलंप्राप्यनशोचति कदाचन
अत्र मत्प्रीतये देवाः प्राणिभिर्धर्मकाङ्क्षिभिः ।
दातव्या गौः प्रयत्नेन सवत्सा विधिपूर्वकम् ॥ ५६ ॥
स्वर्णशृङ्गी रौप्यखुरी वस्त्रद्वयसमावृता । कांस्योपदोहना ताम्रपृष्ठीबहुगुणान्विता
रत्नपुच्छा दुग्धवती घण्टाभरणभूषिता ।
अर्चिता गन्धपुष्पाद्यैः सुप्रसन्नाऽमृतप्रजा ॥ ६१ ॥
द्विजाय वेदविज्ञाय गुणिने निर्मलात्मने । विष्णुभक्तायविदुषे आनृशंस्यरताय च ॥
ब्राह्मणायच गौर्देया सर्वत्र सुखमश्नुते । न देया द्विजमात्राय दातारं सोऽवपातयेत्
मत्प्रीतयेऽत्र दातव्या निर्मलेनान्तरात्मना । स्नातं यैश्च विशुद्ध्यर्थमत्र मद्भक्तितत्परैः
तेषां स्वर्गतयो नित्यं मुक्तिः करतलेस्थिता ॥ ६५ ॥
तथा चक्रहरेः पीठे मत्प्रीत्यै दानमुत्तमम् । जपहोमादिकञ्चापि कर्त्तव्यं यत्नतोनरैः
भवन्तोऽपि विधानेनयात्रांकुर्वन्तुसत्तमाः । अस्माद्गुप्तहरेः स्थानान्निकटेसङ्गमेशुभे
प्रत्यग्भागे गोप्रताराद्योजनत्रयसंमिते । घर्घराम्बुतरङ्गिण्या सरयूः सङ्गता यतः ॥६८
अत्र स्नात्वा विधानेन द्रष्टव्योऽत्र प्रयत्नतः ।
देवो गुप्तहरिर्नाम सर्वकामार्थसिद्धिदः ॥ ६६ ॥

अगस्त्य उवाच

इत्युक्त्वान्तर्दधेदेवः पीताम्बरधरोऽच्युतः । देवाअपिविधानेन कृत्वा यात्रांप्रयत्नतः
अयोध्यायां स्थिता नित्यं हरेर्गुणविमोहिताः ॥ ७० ॥
तदाप्रभृति विप्रेन्द्र! तत्स्थानम्भुवि पप्रथे ।
कार्त्तिक्यां तु विशेषेण यात्रा साम्वत्सरी भवेत् ॥ ७१ ॥
विभोर्गुप्तहरेस्तत्र सङ्गमस्नानपूर्विका । गोप्रतारेच तीर्थेऽस्मिन्सरयूघर्घराश्रिते ॥
स्नात्वा देवोऽर्चनीयोऽयं सर्वकामफलप्रदः ॥ ७२ ॥
तथा चक्रहरेर्यात्रा कर्त्तव्या सुप्रयत्नतः । मार्गशीर्षस्य विशदे पक्षे हरितिथौ नरैः
एवं यः कुरुते यात्रां विष्णुलोके स मोदते ॥ ७४ ॥

श्रीसूत उवाच

एवमुक्त्वा तु विरते मुनौ कलशजन्मनि । कृष्णद्वैपायनो व्यासःपुनराह सविस्मयः

व्यास उवाच

अत्याश्चर्य्यमयीं ब्रह्मन्कथामेतां तपोधन! । उक्तवानसि येनैतत्साश्चर्य्यं मममानसम्
विस्तरेण मम ब्रूहि माहात्म्यं परमाद्भुतम् । श्रृणुसङ्गममाहात्म्यंविप्रेन्द्र! परमाद्भुतम्
स्कन्ददेवाच्छ्रुतं सम्यक्कथयामि तथा तव ॥ ७८ ॥
दशकोटिसहस्राणि दशकोटिशतानिच । तीर्थानि सरयूनद्या घर्घरोदकसङ्गमे ॥
निवसन्ति सदा विप्र! स्कन्दादवगतं मया ॥ ७९ ॥
देवतानां सुराणाञ्च सिद्धानां योगिनां तथा ।
ब्रह्मविष्णुशिवानाञ्च सान्निध्यं सर्वदा स्थितम् ॥ ८० ॥
तस्मिन्सङ्गमसलिलेनरःस्नात्वासमाहितः । सन्तर्प्य पितृदेवांश्चदत्त्वादानंस्वशक्तितः
हुत्वा वैष्णवमन्त्रेण शुचिर्यत्फलमाप्नुयात् ।
तदिहैकमना विप्र! श्रृणु यत्कथयामि ते ॥ ८२ ॥
अश्वमेधसहस्रस्य वाजपेयशतस्य च । कुरुक्षेत्रे महाक्षेत्रे राहुग्रस्ते दिवाकरे ॥ ८३॥
सुवर्णदाने यत्पुण्यमहन्यहनि तद्भवेत् ॥ ८४ ॥
अमावास्यांपौर्णमास्यांद्वादश्योरुभयोरपि । अयनेचव्यतीपातेस्नानंवैष्णवलोकदम्
तिष्ठेद्युगसहस्रन्तु पादेनैकेन यः पुमान् । विधिवत्सङ्गमेस्नायात्पौष्यांतदविशेषतः
लम्बतेऽवाक्छिरा यस्तु युगानामयुतं पुमान् ।
स्नातानां शुचिभिस्तोयैः सङ्गमे प्रयतात्मनाम् ॥ ८७ ॥
व्युष्टिर्भवति या पुंसां न सा क्रतुशतैरपि ॥ ८८ ॥
पौषे मासि विशेषेण स्नानं बहुफलप्रदम् ॥ ८९ ॥
पौषे मासि विशेषेण यः कुर्यात्स्नानमादृतः ।
ब्राह्मणः क्षत्रियोवैश्यः शूद्रो वा वर्णसङ्करः ॥
स याति ब्रह्मणः स्थानं पुनरावृत्तिवर्जितम् ॥ ९० ॥

पौषे मासि तु यो दद्याद् घृताढ्यं दीपमुत्तमम् ।
विधिवच्छ्रद्धया विप्र! श्रृणु तस्याऽपि यत्फलम् ॥ ९१ ॥
नानाजन्मार्जितं पापं स्वल्पंबह्वपिवाभवेत् । तत्सर्वंनश्यति क्षिप्रं तोयस्थंलवणंयथा
आयुरारोग्यमैश्वर्यं सन्ततीःसौख्यमुत्तमम् । प्राप्नोतिफलदंनित्यंदीपदःपुण्यभाङ्नरः
यस्तु शुक्लत्रयोदश्यां पौषेऽत्र प्रयतो व्रती । जागरं कुरुतेधीरः स गच्छेद्भवनंहरेः
जागरं विदधद्रात्रौ दीपं दत्त्वा तु सर्वशः । होमश्च कारयेद्विप्रो नियतात्माशुचिव्रतः
वैष्णवो विष्णुपूजाश्च कुर्वञ्छृण्वन्हरेःकथाम् ।
गीतवादित्रनृत्यैश्च विष्णुतोषणकारकैः ॥
कथाभिः पुण्ययुक्ताभिर्जागृयाच्छर्वरीं नरः ॥ ९६ ॥
ततः प्रभाते विमले स्नात्वा विधिवदादरात् ।
विष्णुं सम्पूज्य विप्रांश्च देयं स्वर्णादि शक्तितः ॥ ९७ ॥
स्वर्णं चाऽन्नञ्च वासांसि योदद्याच्छ्रद्धयाऽन्वितः ।
सङ्गमे विधिवद्विद्वान्स याति परमां गतिम् ॥ ९८ ॥
वर्षे वर्षे तु कर्त्तव्यो जागरः पुण्यतत्परैः ॥ ९९ ॥
हरिः पूज्यो द्विजाः सम्यक्सन्तोष्याः शक्तितो नरैः ।
तेन विष्णोः परातुष्टिः पापानि विफलानि च ।
भवन्ति निर्विषाः सर्पा यथा तार्क्ष्यस्य दर्शनात् ॥ १०० ॥
तत्र स्नातो दिवं याति अत्र स्नातः सुखी भवेत् ॥ १०१ ॥
त्रिषु लोकेषु ये केचित्प्राणिनः सर्व एव ते ।
तर्प्यमाणाः परां तृप्तिं यान्ति सङ्गमजैर्जलैः ॥ १०२ ॥
भूतानामिहसर्वेषां दुःखोपहतचेतसाम् । गतिमन्वेषमाणानां न सङ्गमसमा गतिः ॥
समावरान्सप्त परान्पुरुषश्चाऽऽत्मना सह । पुंसस्तारयते सर्वान्सङ्गमे स्नानमाचरन्
जात्यन्धैरिह ते तुल्यास्तथा पङ्गुभिरेव च । समेत्याऽत्रचनस्नान्ति सरयूघर्घरसङ्गमे
वर्णानां ब्राह्मणो यद्वत्तथा तीर्थेषु सङ्गमः । सरयूघर्घरायोगे वैष्णवस्थो नरः सदा

अत्र स्नानेन दानेन यथाशक्त्याजितेन्द्रियः । होमेनविधियुक्तेननरःस्वर्गमवाप्नुयात्
नरो वा यदि वा नारी विधिवत्स्नानमाचरेत् ।
स्वर्गलोकनिवासो हि भवेत्तस्य न संशयः ॥ १०८ ॥
यथा वह्निर्दहेत्सर्वं शुष्कमार्द्रमथाऽपि वा । भस्मीभवन्तिपापानितत्समागममज्जनात्
एकतः सर्वतीर्थानि नानाविधिफलानि वै । सरयूघर्घरोत्पन्नसङ्गमस्त्वधिको भवेत्
सर्वतीर्थावगाहस्यफलंयाद्दृक्स्मृतं श्रुतौ । ताद्दृक्फलंनृणांसम्यग्भवेत्सङ्गममज्जनात्
गोप्रताराभिधं तीर्थमपरं वर्ततेऽनघ! । सन्निधौ सङ्गमस्यैव महापातकनाशनम् ११२
यत्रस्नानेन दानेन न शोचति नरः क्वचित् । गोप्रतारसमं तीर्थं न भूतं न भविष्यति
वाराणस्यां यथा विद्वन्वर्त्तते मणिकर्णिका ।
उज्जयिन्यां यथा विप्र! महाकालनिकेतनम् ॥ ११४ ॥
नैमिषे चक्रवापी तु यथा तीर्थतमास्मृता । अयोध्यायांतथाविप्रगोप्रताराभिधंमहत्
यत्र रामाज्ञया विद्वन्साकेतनगरीजनाः । अवापुः स्वर्गमतुलं निमज्ज्य परमाम्भसि ॥

व्यास उवाच

अवापुस्ते कथं स्वर्गं साकेतनगरीजनाः । कथञ्च राघवो विद्वन्नेतत्कथय सुव्रत ! ॥

अगस्त्य उवाच

सावधानः शृणु मुने!कथामेतांसुविस्तरात् । यथाजगामरामोऽसौस्वर्गंसचपुरीजनः
पुरा रामो विधायैव देवकार्य्यमतन्द्रितः । स्वर्गं गन्तुं मनश्चक्रे भ्रातृभ्यांसहवीरधीः
ततो निशम्य चारेण वानराः कामरूपिणः । ऋक्षगोपुच्छरक्षांसि समुत्पेतुरनेकशः
देवगन्धर्वपुत्राश्च ऋषिपुत्राश्च वानराः । रामक्षयं विदित्वा तु सर्व एव समागताः ॥
ते राममनुगत्योचुः सर्वे वानरयूथपाः । तवाऽनुगमने राजन्सम्प्राप्ताःस्मइहानघ! ॥
यदि राम विनास्माभिर्गच्छेस्त्वं पुरुषर्षभ! । सर्वे खलुहताः स्याम दण्डेन महतानृप
श्रुत्वा तु वचनं तेषामृक्षवानररक्षसाम् । विभीषणमुवाचाऽथ राघवस्तत्क्षणं गिरा
यावत्प्रजाधरिष्यन्ति तावद्देव विभीषण! । कारयस्वमहद्राज्यंलङ्कांत्वंपालयिष्यसि
शाधि राज्यञ्च खल्वेतन्नान्यथा मे वचः कुरु ।

प्रजास्त्वं रक्ष धर्मेण नोत्तरं वक्तुमर्हसि ॥ १२६ ॥
एवमुक्त्वा तु काकुत्स्थोहनुमन्तमथाब्रवीत् । वायुपुत्रचिरञ्जीवमाप्रतिज्ञांवृथाकृथाः
यावल्लोका वदिष्यन्ति मत्कथां वानरर्षभ! । तावत्त्वंधारयप्राणान्प्रतिज्ञांप्रतिपालयन्
मैन्दश्च द्विविदश्चैव अमृतप्राशनावुभौ । यावल्लोका धरिष्यन्ति तावदेतौ धरिष्यतः
पुत्रपौत्राश्च येऽस्माकं तान्रक्षन्त्विह वानराः ।
एवमुक्त्वा तु काकुत्स्थः सर्वानथ च वानरान्
मया सार्धं प्रयातेति तदा तान्राघवोऽब्रवीत् ॥ १३० ॥
प्रभातायां तु शर्वर्यां पृथुवक्षा महाभुजः । रामः कमलपत्राक्षः पुरोधसमथाऽब्रवीत्
अग्निहोत्राणि यान्त्वग्रे दीप्यमानानिसर्वशः । वाजपेयातिरात्राणिनिर्यान्तुचममाग्रतः
ततो वसिष्ठस्तेजस्वी सर्वं निश्चित्य चेतसा ।
चकार विधिवत्कर्म महाप्रास्थानिकम्विधिम् ॥ १३३ ॥
ततः क्षौमाम्बरधरो ब्रह्मचर्यसमन्वितः । कुशानादाय पाणिभ्यां महाप्रस्थानमुद्यतः
न व्याहरच्छुभं किञ्चिदशुभं वा नरेश्वरः । निष्क्रम्यनगरात्तस्मात्सागरादिवचन्द्रमाः
रामस्य सव्यपार्श्वे तु सपद्मा श्रीः समाश्रिता ।
दक्षिणे ह्रीर्विशालाक्षी व्यवसायस्तथाऽग्रतः ॥ १३६ ॥
नानाविधायुधान्यत्र धनुर्ज्याप्रभृतीनि च । अनुव्रजन्ति काकुत्स्थं सर्वेपुरुषविग्रहाः
वेदो ब्राह्मणरूपेणसावित्रीसव्यदक्षिणे । ॐकारोऽथवषट्कारःसर्वेरामं तदाऽव्रजन्
ऋषयश्चमाहात्मानःसर्वे चैवमहीधराः । अनुगच्छन्तिकाकुत्स्थंस्वर्गद्वारमुपस्थितम्
तथानुयान्ति काकुत्स्थमन्तःपुरगताःस्त्रियः । सवृद्धाबालदासीकाःसवर्षद्वाररक्षकाः
सान्तःपुरश्च भरतः शत्रुघ्नसहितो ययौ । रामं व्रजन्तमागम्य रघुवंशमनुव्रताः ॥१४१
ततोविप्रामहात्मानःसाग्निहोत्राःसमन्ततः । सपुत्रदाराःकाकुत्स्थमनुगच्छन्तिसर्वशः
मन्त्रिणो भृत्ययुक्ताश्च सपुत्राः सहबान्धवाः ।
सर्वे ते सानुगाश्चैव ह्यनुगच्छन्ति राघवम् ॥ १४३ ॥
ततः सर्वाः प्रकृतयो हृष्टपुष्टजनावृताः । गच्छन्तमनुगच्छन्ति राघवं गुणरञ्जिताः ॥

तथा प्रजाश्च सकलाः सुपुत्राश्चसबान्धवाः । राघवस्यानुगाश्चासन्हृष्टाविगतकल्मषम्
स्नाताः शुक्लाम्बरधराः सर्वेप्रयतमानसाः । कृत्वा किलकिलाशब्दमनुयाताश्च राघवम्
न कश्चित्तत्र दीनोऽभून्न भीतोनाऽतिदुःखितः । प्रहृष्टामुदिताः सर्वेबभूवुःपरमाद्भुताः
द्रष्टुकामाश्चनिर्वाणं राज्ञो जनपदास्तथा । सम्प्राप्तास्तेऽपिद्रष्टैव नभोमार्गेणचक्रिणा
ऋक्षवानररक्षांसि जनाश्च पुरवासिनः । आगत्य परया भक्त्या पृष्ठतः समुपाययुः ॥
तानिभूतानि नगरेह्यन्तर्धानगतान्यपि । राघवं तेऽप्यनुययुः स्वर्गद्वारमुपस्थितम् ॥

यानि पश्यन्ति काकुत्स्थं स्थावराणि चराणि च ।
सत्त्वानि स्वर्गगमने मतिं कुर्वन्ति तान्यपि ॥ १५१ ॥
नाऽऽसीत्सत्त्वमयोध्यायां सुसूक्ष्ममपि किञ्चन ।
यद्राघवं नाऽनुयाति स्वर्गद्वारमुपस्थितम् ॥ १५२ ॥

अथार्द्धयोजनंगत्वा नदीं पश्चान्मुखो ययौ । सरयूं पुण्यसलिलां ददर्श रघुनन्दनः ॥
अथ तस्मिन्मुहूर्ते तु ब्रह्मालोकपितामहः । सर्वैः परिवृतोदेवैर्ऋषिभिश्च महात्मभिः
आययौ तत्र काकुत्स्थं स्वर्गद्वारमुपस्थितम् ॥ १५४ ॥

विमानशतकोटिभिर्दिव्याभिःसर्वतोवृतः । दीपयन्सर्वतोव्योमज्योतिर्भूतमनुत्तमम्
स्वयंप्रभैश्च तेजोभिर्महद्भिःपुण्यकर्मभिः । पुण्या वाता ववुस्तत्रगन्धवन्तः सुखप्रदाः
सपुण्यपुष्पवर्षेश्च वायुयुक्तं महाजवम् । गन्धर्वैरप्सरोभिश्च तस्मिन्सूर्यउपस्थितः ॥

सरयूसलिलं रामः पद्भ्यां स समुपास्पृशत् ।
ततो ब्रह्मा सुरैर्युक्तं स्तोतुं समुपचक्रमे ॥ १५८ ॥

त्वं हि लोकपतिर्देव न त्वां जानाति कश्चन । अहं ते वै विशालाक्ष! भूतपूर्वपरिग्रहः
त्वमचिन्त्यं महद्भूतमक्षयंलोकसंग्रहे । यामिच्छसिमहावीर्यतांतनुं प्रविशस्वकाम्
पितामहस्य वचनादिदमेवाविशत्स्वयम् । सुदिव्यं वैष्णवं तेजः संसारंससहानुजः
ततो विष्णुतनुं देवाः पूजयन्तः सुरोत्तमम् ॥ १६१ ॥

साध्यामरुद्गणाश्चैवसेन्द्राःसाग्निपुरोगमाः । येचदिव्याऋषिगणागन्धर्वाप्सरसस्तथा
सुवर्णा नागयज्ञाश्च दैत्यदानवराक्षसाः ॥ १६२ ॥

देवाः प्रहृष्टा मुदिताः सर्वे पूर्णमनोरथाः । साधुसाध्विवितितेसर्वेत्रिदिवस्थावभाषिरे
अथ विष्णुर्महातेजाः पितामहमुवाच ह । एषां लोकं जनौघानां दातुमर्हसि सुव्रत
इमे तु सर्वेमत्स्नेहादायाताःसर्वमानवाः । भक्ताश्चभक्तिमन्तश्चत्यक्तात्मानोऽपिसर्वशः
तच्छ्रुत्वा विष्णुकथितं सर्वलोकेश्वरोऽब्रवीत् ।
लोकं सन्तानिकं नाम संस्थास्यन्ति हि मानवाः ॥ १६६ ॥

स्वर्गद्वारेऽत्रवैतीर्थेराममेवानुचिन्तयन् । प्राणांस्त्यजतिभक्तयावैससन्तानम्परंलभेत्
सर्वे सन्तानिकं नाम ब्रह्मलोकादनन्तरम् ।
वानराश्च स्वकां योनिं राक्षसाश्चाऽपि राक्षसीम् ॥ १६८ ॥

यस्या विनिःसृता ये वै सुरासुरतनूद्भवाः । आदित्यतनयश्चैव सुग्रीवः सूर्यमण्डलम्
ऋषयो नागयक्षाश्च प्रयास्यन्ति स्वकारणम् । तथाब्रुवतिदेवेशेगोप्रतारमुपस्थितम्
तज्जलं सरयूं भेजे परिपूर्णं ततोजलम् । अवगाह्य जलं सर्वे प्राणांस्त्यक्त्वाप्रहृष्टवत्
मानुषं देहमुत्सृज्य तेविमानान्यथाऽऽरुहन् । तिर्यग्योनिगतायेच प्रविश्य सरयूं तदा
देहत्यागश्चतेतत्रकृत्वादिव्यवपुर्द्धराः । तथान्यान्यपि सत्त्वानि स्थावराणिचराणिच
प्राप्य चोत्तमदेहं वै देवलोकमुपागमन् । तस्मिंस्तत्र समापन्ने वानरा ऋक्षराक्षसाः
तेऽपि प्रविविशुः सर्वे देहान्निक्षिप्य वै तदा ॥ १७४ ॥

तदा स्वर्गंगताःसर्वेस्मृत्वालोकगुरुंविभुम् । जगामत्रिदशैः सार्द्धं रामोहृष्टोमहामतिः
अतस्तद्गोप्रताराख्यं तीर्थंविख्यातिमागतम् । गोप्रतारे परोमोक्षोनान्यतीर्थेषुविद्यते
जन्मान्तरशतैर्विप्र योगोऽयं यदि लभ्यते । मुक्तिर्भवतितत्त्वेकजन्मनालभ्यते न वा
गोप्रतारेण सन्देहोहरिर्भक्त्यासुनिश्चितः । एकेनजन्मनान्योऽपियोगमोक्षञ्चविन्दति
गोप्रतारे नरो विद्वान्योऽपि स्नाति सुनिश्चितः ।
विशत्यसौ परं स्थानं योगिनामपि दुर्लभम् ॥ १७६ ॥
कार्त्तिक्याञ्च विशेषेण स्नातव्यं विजितेन्द्रियैः ।
कार्त्तिके मासि विप्रर्षे सर्वे देवाः सवासवाः ॥
स्नातुमायान्त्ययोध्यायां गोप्रतारे विशेषतः ॥ १८० ॥

गोप्रतारसमं तीर्थं न भूतं न भविष्यति । यत्र प्रयागराजोऽपि स्नातुमायातिकार्त्तिके

निष्पापःकलुषं त्यक्त्वा शुक्लाङ्गः सितकञ्चुकः ।

शुद्ध्यर्थं साधु कमोऽसौ प्रयागे मुनिसत्तम! ॥ १८२ ॥

यानि कानि च तीर्थानि भूमौ दिव्यानि सुव्रत! ।

कार्त्तिक्यां तानि सर्वाणि गोप्रतारे वसन्ति वै ॥ १८३ ॥

गोप्रतारे जपो होमः स्नानं दानञ्च शक्तितः । सर्वमक्षयतां याति श्रद्धयानियमव्रतम्

कार्त्तिके प्राप्य तद्यान्ति तीर्थानि सकलान्यपि ।

गोप्रतारं गमिष्यामः पापं त्यक्तुमितीच्छया ॥ १८५ ॥

गोप्रतारे कृतं स्नानं सर्वपापप्रणाशनम् । गोप्रतारे नरः स्नात्वा दृष्ट्वा गुप्तहरिंविभुम्

सर्वपापैः प्रमुच्येत नाऽत्र कार्या विचारणा ॥ १८६ ॥

विष्णुमुद्दिश्य विप्राणां पूजनञ्च विशेषतः । कर्त्तव्यं श्रद्धया युक्तैः स्नानपूर्वं यतव्रतैः

पयस्विनी च गौर्देया सालङ्कारा च शक्तितः । विप्राय वेदविदुषे नियमव्रतशालिने

ब्राह्मणायाऽतिशुचये विष्णुप्रीत्यै यतात्मना ॥ १८८ ॥

अन्नं बहुविधं हेमवासांसिविविधानिच । दातव्यानि हरेः प्राप्त्यैभक्त्यापरमयायुतैः

सूर्यग्रहे कुरुक्षेत्रे नर्मदायां शशिग्रहे । तुलादानस्य यत्पुण्यं तदत्र दीपदानतः ॥१९०॥

घृतेन दीपको यस्य तिलतैलेन वा पुनः । ज्वलते मुनिशार्दूल! हयमेधेन तस्य किम्

तेनेष्टं क्रतुभिः सर्वैः कृतं तीर्थावगाहनम् । दीपदानं कृतं येन कार्त्तिके केशवाग्रतः ॥

नानाविधानि नीर्थानि भुक्तिमुक्तिप्रदानि च ।

गोप्रतारस्य तान्यत्र कलां नार्हन्ति षोडशीम् ॥ १९३ ॥

स्वर्णमल्पञ्च यो दद्याद्ब्राह्मणे वेदपारगे । शुभाङ्गतिमवाप्नोति ह्यग्निवच्चैव दीप्यते

गोप्रताराभिधे तीर्थे त्रिलोकी विश्रुते द्विज! ।

दत्त्वाऽन्नञ्च विधानेन न स भूयोऽभिजायते ॥ १९५ ॥

तत्र स्नानंतु यः कुर्याद्विप्रान्संतर्पयेन्नरः । सौत्रामणेश्च यज्ञस्य फलम्प्राप्नोतिमानवः

एकाहारस्तु यस्तिष्ठेन्मासं तत्र यतव्रतः । यावज्जीवकृतं पापं सहसा तस्य नश्यति

अग्निप्रवेशं ये कुर्युर्गोप्रतारे विधानतः । तेविशन्ति पदं विष्णोर्निःसन्दिग्धं तपोधन

कुर्वन्त्यनशनं येऽत्र विष्णुभक्त्या सुनिश्चिताः ॥

न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ १९९ ॥

अर्चयेद्यस्तु गोविन्दं गोप्रतारे हि मानवः ॥

दशसौवर्णिकं पुण्यं गोप्रतारे प्रकथ्यते ॥ २०० ॥

अग्निहोत्रफलो धूपो गोविन्दस्य समर्पितः ॥

भूमिदानेन सदृशं गन्धदानफलं स्मृतम् ॥ २०१ ॥

अत्यद्भुतमिदं विद्धिस्थानमेतत्प्रकीर्तितम् ॥

कार्त्तिक्यां तु विशेषेण अत्र स्नात्वा शुचिव्रतः ॥ २०२ ॥

स्वर्गद्वारेनरःस्नात्वादशस्वर्णफलंलभेत् । स्वर्णदःस्वर्गवासीचयोदद्याच्छ्रद्धयान्वितः

सुतीर्थे पर्वणि श्रेष्ठे दशस्वर्णफलप्रदे । ज्येष्ठशुक्लचतुर्दश्यां रात्रौ जागरणं चरेत् ॥

उपोषितः शुचिः स्नातो विष्णुपूजनतत्परः । दीपंदद्यात्प्रयत्नेननानाफलविधायिनम्

तावद्गर्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले । यावद्द्याज्जले दीपं कार्त्तिके केशवाग्रतः

पौर्णमास्यांप्रभातेतुस्नात्वानिर्मलमानसः । हरिंसम्पूज्यविधिवद्विधायश्राद्धमादरात्

दत्त्वाऽन्नंचयथाशक्त्यासन्तोष्यब्राह्मणांस्ततः।वस्त्रादिभिरलङ्कारैःसम्पूज्यद्विजदम्पती

विभुंगुप्तहरिं दृष्ट्वा सम्पूज्य तु विशेषतः । नमस्कृत्याऽनु तत्तीर्थं शुचिस्तद्गतमानसः

स्वर्गद्वारे च विधिवन्मध्याह्ने स्नानमाचरेत् ।

सर्वपापविशुद्धात्मा विष्णुलोके महीयते ॥ २१० ॥

इति परमविधानैर्गोप्रतारे विधाय प्रथितसुकृतमूर्त्तिः स्नानमुच्चैः प्रयत्नात् ।

कलितनिखिलपापः पूजयित्वाऽऽदरेणाऽच्युतममलविकाशोविष्णुसायुज्यमेति

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे-

ऽयोध्यामाहात्म्ये स्वर्गद्वारगोप्रतारतीर्थमाहात्म्यवर्णनं

नाम षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

क्षीरोदकादिघोषार्ककुण्डान्तमाहात्म्यवर्णनम्

अगस्त्य उवाच

तीर्थमन्यत्प्रवक्ष्यामि क्षीरोदकमिति स्मृतम् ।
सीताकुण्डाच्च वायव्ये वर्त्तते गुणसुन्दरम् ॥
पुण्यैकनिचयस्थानं सर्वदुःखविनाशनम् ॥ १ ॥

पुरा दशरथो राजा पुत्रेष्टिं नाम नामतः । चकार विधिवद्यज्ञं पुत्रार्थं यत्र चाऽऽदरात् क्रतुं समापयामास सानन्दो भूरिदक्षिणम् । यज्ञान्ते क्रतुभुक्तत्र मूर्तिमान्समदृश्यत हस्ते कृत्वा हेमपात्रं हविःपूर्णमनुत्तमम् । तस्मिन्हविषिसङ्कीर्णं वैष्णवं तेजउत्तमम्
चतुर्विधं विभज्यैव पत्नीभ्योदत्तवान्नृपः ॥ ४ ॥

यत्र तत्क्षीरसम्प्राप्तिर्जाता परमदुर्लभा । क्षीरोदकमिति ख्यातं तत्स्थानं पापनाशनम्
उदकेनाभिव्यक्तं च उत्तमञ्च फलप्रदम् ॥ ५ ॥
तत्र स्नात्वा नरो धीमान्विजितेन्द्रिय आदरात् ।
सर्वान्कामानवाप्नोति पुत्रांश्च सुबहुश्रुतान् ॥ ६ ॥

आश्विनेशुक्लपक्षस्यएकादश्यां जितव्रतः । तत्रस्नात्वा विधानेनदत्त्वाशत्तयाद्विजन्मने
विष्णुं सम्पूज्य विधिवत्सर्वान्कामानवाप्नुयात् ।
पुत्रानवाप्नुयाद्धिद्धि धर्मांश्च विधिवन्नरः ॥ ८ ॥
तस्मात्क्षीरोदकस्थानान्नैर्ऋते दिग्दले श्रितम् ।
ख्यातं बृहस्पतेः कुण्डमुद्दण्डाचण्डमण्डितम् ॥ ९ ॥

सर्वपापप्रशमनं पुण्यामृततरङ्गितम् । यत्र साक्षात्सुरगुरुर्निवासं किल निर्ममे ॥ १०॥ यज्ञश्च विधिवच्चक्रे बृहस्पतिरुदारधीः । नानामुनिगणैर्युक्तं रम्यं बहुफलप्रदम् ॥
सुपर्णच्छायसम्पन्नं कुण्डं तत्पापिदुर्ल्लभम् ॥ ११ ॥

इन्द्रादयोऽपि विबुधा यत्र स्नात्वा प्रयत्नतः ॥
मनोऽभीष्टफलं प्राप्ताः सौन्दर्यौदार्यतुन्दिलाः ॥ १२ ॥
यत्र स्नानेन दानेन नरो मुच्येत किल्बिषात् ॥ १३ ॥

भाद्रे शुक्ले तु पञ्चम्यां यात्रा तत्र फलप्रदा। अन्यदाऽपिगुरोर्वारेस्नानं बहुफलप्रदम्
बृहस्पतेस्तथा विष्णोः पूजां तत्र य आचरेत् ॥
सर्वपापविनिर्मुक्तो विष्णुलोके स मोदते ॥ १५ ॥

भवेद्बृहस्पतेः पीडा यस्यगोचरवेधतः । तेनाऽत्रविधिवत्स्नानंकार्यं सङ्कल्पपूर्वकम् होमंकृत्वा गुरोर्मूर्तिःसुवर्णेनविनिर्मिता । स्थित्वाजले प्रदेयावै पीताम्बरसमन्विता वेदज्ञायाऽतिशुचये स्नात्वा पीडापनुत्तये । होमश्च कारयेत्तत्र ग्रहजाप्यविधानतः ॥
एवं कृते न सन्देहो ग्रहपीडा प्रणश्यति ॥ १६ ॥

तद्दक्षिणे मुनिश्रेष्ठरुक्मिणीकुण्डमुत्तमम् । चकारयत्स्वयंदेवीरुक्मिणीकृष्णवल्लभा तत्र विष्णुः स्वयं चक्रे निवासंसलिलेतदा । वरप्रदानात्स्नेहेनभार्यायाःप्रगुणीकृतम् तत्र स्नानं तथा दानं होमं वैष्णवमन्त्रकम् । द्विजपूजां विष्णुपूजांकुर्वीतप्रयतोनरः तत्र साम्वत्सरी यात्रा कर्त्तव्या सुप्रयत्नतः । ऊर्ज्जकृष्णनवम्याञ्च सर्वपापापनुत्तये
पुत्रवाञ्जायते वन्ध्यो यात्रां कृत्वा न संशयः ।
नारीभिर्वा नरैर्वापि कर्त्तव्यं स्नानमादरात् ॥ २४ ॥
भुक्त्वा भोगान्समग्रांश्च विष्णुलोके स मोदते ।
लक्ष्मीकामनयातत्र स्नातव्यञ्च विशेषतः ॥ २५ ॥

सर्वकाममवाप्नोतितत्रस्नानेनमानवः । रुक्मिणीश्रीपतिप्रीत्यैदातव्यञ्चस्वशक्तितः कर्त्तव्या विधिवत्पूजा ब्राह्मणानां विशेषतः । ध्येयोलक्ष्मीपतिस्तत्रशङ्खचक्रगदाधरः पीताम्बरधरः स्रग्वी नारदादिभिरीडितः । तार्क्ष्यासनोमुकुटवान्महेन्द्रादिविभूषितः सर्वकामफलावाप्त्यै वक्षोलक्षितकौस्तुभः । अतसीकुसुमश्यामः कमलामललोचनः
एवं कृते न सन्देहः सर्वान्कामानवाप्नुयात् ।
इह लोके सुखम्भुक्त्वा हरिलोके स मोदते ॥ ३० ॥

अतः परम्प्रवक्ष्यामि तीर्थमन्यदघापहम् । कलिकिल्विषसंहारकारकं प्रत्ययात्मकम्
परम्पवित्रमतुलं सर्वकामार्थसिद्धिदम् । धनयक्षइतिख्यातं परं प्रत्ययकारकम् ॥३२

रुक्मिणीकुण्डवायव्यदिग्दले संस्मृतं शुभम् ।
हरिश्चन्द्रस्य राजर्षेरासीत्तत्र धनं महत् ॥ ३३ ॥

तस्य रक्षार्थमत्यर्थं रक्षितो यक्षउच्चकैः । विश्वामित्रो मुनिः पूर्वं यदाचैव पराजयत्
हरिश्चन्द्रं नरपतिं राजसूयकरम्परम् । राज्यं जग्राह सकलं चतुरङ्गबलान्वितम् ॥
तद्वशेऽदाच्च स मुनिर्धनं सकलमुत्तमम् । तद्रक्षार्थं प्रयत्नेन यक्षं स्थापितवानसौ ॥

प्रमन्थुरइतिख्यातं प्रमोदानन्दमन्दिरम् ।
रक्षां विदधतस्तस्य बहुयत्नेन सर्वशः ॥ ३७ ॥

तुतोष स मुनिर्धीमान्कन्दाचिद्विजितेन्द्रियः । उवाचमधुरं वाक्यंप्रीत्यापरमयायुतः

विश्वामित्र उवाच

वरं वरय धर्मज्ञ! क्षिप्रमेवविमत्सरः । भक्त्या परमया धीर! सन्तुष्टोऽस्मिविशेषतः

यक्ष उवाच

वरं प्रयच्छसि यदि विप्रवर्य! मदीप्सितम् । ममाङ्गमतिदुर्गन्धि शापाच्च नृपतेरभूत्
सुगन्धयितुं ब्रह्मर्षे! तत्प्रसीदमुनीश्वर! ॥ ४० ॥

अगस्त्य उवाच

एवमुक्ते तु यक्षेण मुनिर्ध्यानस्थलोचनः । तंविविच्यानयाभक्त्याअभिषेकंचकारसः
तीर्थोदकेन विधिवत्कृत्वासङ्कल्पमादरात् । ततः सोऽभूत्क्षणेनैवसुगन्धोत्तरविग्रहः
तथाभूतः स मधुरं प्रोवाचप्राञ्जलिस्ततः । पुनः पुरः स्थितोधीमान्विनयावनतस्तदा

यक्ष उवाच

त्वत्कृपाभिरहंधीर जातः सुरभिविग्रहः । एतत्स्थानं यथाख्यातिंयातिसर्वज्ञतत्कुरु
त्वत्प्रसादेन विप्रर्षे! तथा यत्नं विधेहि वै ॥ ४५ ॥

अगस्त्य उवाच

एवमुक्तः क्षणं ध्यात्वा मुनिस्तिमितलोचनः ।

यक्षं प्रति प्रसन्नात्मा ह्यवाच श्लक्ष्णया गिरा ॥ ४६ ॥

विश्वामित्र उवाच

प्रसिद्धिमतुलां यक्ष एतत्स्थानं गमिष्यति । धनयक्ष इतिख्यातिमेतत्तीर्थंगमिष्यति
सौन्दर्य्यदं शरीरस्यपरंप्रत्ययकारकम् । यत्रस्नात्वाविधानेनदौर्गन्ध्यंत्यजतिक्षणात्

तत्र स्नानं प्रयत्नेन कर्त्तव्यं पुण्यकाङ्क्षिभिः ॥ ४८ ॥

दानंश्रद्धास्वशक्तिभ्यांलक्ष्मीपूजाविशेषतः । तत्रस्नानेनदानेन लक्ष्मीप्रीत्यैविशेषतः
पूजया तु निधीनाञ्च नवानामपि सुव्रत! । इहलोके सुखं भुक्त्वा परलोके स मोदते
महापद्मस्तथा पद्मः शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च सर्वाश्च निधयो नव
एतेषामपि कुण्डेऽत्र सन्निधिर्भविताऽनघ! । एतेषां तु विशेषेण पूजाबहुफलप्रदा ॥

जलमध्ये प्रकर्त्तव्यं निधिलक्ष्मीप्रपूजनम् ॥ ५३ ॥
अन्नं बहुविधं देयं वासांसि विविधानि च ॥ ५४ ॥

सुवर्णादि यथा शक्त्या वित्तशाठ्यं विवर्जयेत् । गुप्तंदानं प्रयत्नेनकर्त्तव्यंसुप्रयत्नतः

फलानि च सुवर्णानि देयानि च विशेषतः ॥ ५६ ॥

कृष्णपक्षे चतुर्दश्यां स्नानं बहुफलप्रदम् । श्रद्धयापरयायुक्तैः कर्त्तव्यंश्रद्धयाऽधिकम्

माघे कृष्णचतुर्दश्यां यात्रा साम्वत्सरी भवेत् ।
तत्र स्नानं पितृणान्तु तर्पणञ्च विशेषतः ॥ ५८ ॥

आब्रह्मस्तम्बपर्यन्तं जगत्तृप्यत्विति ब्रुवन् । अपसव्येन विधिवत्तर्प्पयेदञ्जलित्रयम् ॥
एवंकुर्वन्नरोयक्ष! न मुह्यातिकदाचन । अत्र स्नातो दिवं याति अत्रस्नातःसुखीभवेत्
अत्र स्नातेन ते यक्ष कर्त्तव्यं पूजनम्पुरः । त्वत्पूजनेन विधिवन्नृणां पापक्षयोभवेत्
नमः प्रमथराजेति पूजामन्त्र उदाहृतः । तीर्थमध्ये प्रकर्त्तव्यं पूजनं श्रवणादिकम् ॥
निधिलक्ष्म्योस्तथायक्ष! तवपूजा विशेषतः । एवंयःकुरुतेधीरसर्वान्कामानवाप्नुयात्

धनार्थी धनमाप्नोति पुत्रार्थी पुत्रमाप्नुयात् ।
मोक्षार्थी मोक्षमाप्नोति तत्किं न यदिहाऽऽप्यते ॥ ६४

यस्तु मोहान्नरोयक्ष स्नानं नकुरुतेकिल । तस्यसाम्वत्सरंपुण्यंत्वंग्रहीष्यसिसर्वशः

इति दत्त्वा वरांस्तस्मै विश्वामित्रोमुनीश्वरः । अन्तर्दधेमुनिवरस्तदासचतपोनिधिः
तदाप्रभृतितत्स्थानंपरमांख्यातिमाययौ । तस्यतीर्थस्यसकलाभूमिःस्वर्णविनिर्मिता
दिव्यरत्नौघखचिता समन्तादुपशोभिता । एवं यः कुरुते विद्वन्सयातिपरमांगतिम्
धनयक्षाद्दुत्तरस्मिन्दिग्भागेसंस्थितं द्विज! । वसिष्ठकुण्डंविख्यातंसर्वपापापहं सदा

वसिष्ठस्य सदा तत्र निवासः सुतपोनिधेः ।
अरुन्धती सदा यस्य वर्तते निर्मलव्रता ॥ ७० ॥

अत्र स्नानंविशेषेणश्राद्धपूर्वमतन्द्रितः । यः कुर्यात्प्रयतोधीमांस्तस्यपुण्यमनुत्तमम्
वामदेवस्य यत्रैव सन्निधिर्वर्ततेऽनघ! । वशिष्ठवामदेवौतु पूजनीयौ प्रयत्नतः ॥७२॥
पतिव्रतापूजनीयाऽरुन्धतीचविशेषतः । स्नातव्यंविधिनासम्यग्दातव्यञ्चस्वशक्तितः
सर्वकामफलप्राप्तिर्जायते नात्र संशयः । अत्र यः कुरुते स्नानं स वसिष्ठसमो भवेत्
भाद्रेमासिसितेपक्षेपञ्चम्यांनियतव्रतः । तस्यसाम्वत्सरीयात्राकर्त्तव्याविधिपूर्विका

विष्णुपूजा प्रयत्नेन कर्तव्या श्रद्धयाऽत्र वै ।
सर्वपापविशुद्धात्मा विष्णुलोके महीयते ॥ ७६ ॥
वसिष्ठकुण्डाद्द विप्रेन्द्र! प्रत्यग्दिग्दलमाश्रितम् ।
विख्यातं सागरंकुण्डं सर्वकामार्थसिद्धिदम् ॥
यत्र स्नानेन दानेन सर्वकामानवाप्नुयात् ॥ ७७ ॥
पौर्णमास्यां समुद्रस्य स्नानाद्यत्पुण्यमाप्नुयात् ।
तत्पुण्यं पर्वणि स्नातो नरश्चाऽक्षयमाप्नुयात् ॥ ७८ ॥

तस्मादत्रविधानेनस्नातव्यंपुत्रकाङ्क्षया । आश्विनेपौर्णमास्यांतुविशेषात्स्नानमाचरेत्
एवं कुर्वन्नरोविद्वान्सर्वपापैः प्रमुच्यते । अत्र स्नात्वा नरोदत्त्वा यथाशक्त्यादिवम्व्रजेत्

सागरान्नैर्ऋतेभागे योगिनीकुण्ढमुत्तमम् ।
यत्राऽऽसते चतुःषष्टियोगिन्यो जलसंस्थिताः ॥ ८१ ॥

सर्वार्थसिद्धिदाः पुंसांस्त्रीणाञ्चैवविशेषतः । परसिद्धिप्रदाःसर्वाः सर्वकामफलप्रदाः
आश्विने शुक्लपक्षस्य अष्टम्याञ्च विशेषतः । स्नातव्यञ्च प्रयत्नेन योगिनीप्रीतयेनृभिः

अत्रस्तानंतथादानंसर्वंसफलतांम्व्रजेत् । यक्षिणीप्रभृतयः सिद्धा भवन्त्यत्र नसंशयः
योगिनीकुण्डतः पूर्वमुर्वशीकुण्डमुत्तमम् । यत्र स्नातोनरोविद्वन्नुर्वशींदिविसंश्रयेत्
पुराकिल मुनिर्धीरो रैभ्योनामतपोधनः । चचारहिमवत्पार्श्वे निराहारोजितेन्द्रियः
तत्तपो विपुलं दृष्ट्वा भीतः सुरपतिस्ततः । उर्वशीं प्रेषयामास तपोविघ्नाय चादरात्
ततः सा प्रेषिता तेनाजगाम गजगामिनी । उवास हिमवत्पार्श्वे रैभ्याश्रममनुत्तमम्
नवफुल्लताकुञ्जे मञ्जुकूजद्विहङ्गमे । किन्नरीकेलिसङ्गीतस्तिमिताङ्गकुरङ्गके ॥८९॥

पुन्नागकेशराशोकच्छिन्नकिसलयपिञ्जरे ।
कल्पिते काञ्चनगिरौ द्वितीय इव वेधसा ॥ ९० ॥

सा वभौ कान्तिसर्वस्वकोशःकुसुमधन्वनः । उर्वश्यनल्पसामान्यलावण्यामृतवाहिनी
अङ्गप्रभासुवर्णेन सितमौक्तिकशोभिता । तारुण्यरुचिरत्वेन तारुण्येन विभूषिता ॥
विलोललोचनापाङ्गतरङ्गधवलत्विषा । नवपल्लवसच्छायं कल्पयन्ती निजाधरम् ॥

कर्णोपलम्बिसङ्घुष्यद्भृङ्गाढ्यच्चूतमञ्जरी ।
सुधागर्भसमुद्भूता पारिजातलता यथा ॥ ९४ ॥

तनुमध्या पृथुश्रोणिर्वर्णोद्भिन्नपयोधरा । निःशाणितशरस्येव शक्तिः कुसुमधन्वनः ॥
अपश्यदाश्रमे तस्मिन्मुनिरायतलोचनाम् । नयनानलदाहेन विदग्धेन मनो भुवा ॥९६
त्रिनेत्रवञ्चनायेव कल्पितां ललनातनुम् । तामाश्रमलतापुष्पकाञ्चीरचितकुण्डलाम्

विलोक्य तां विशालाक्षीं मुनिर्व्याकुलितेन्द्रियः ।
बभूव रोषसन्ततः शशाप च बहु ज्वलन् ॥ ९८ ॥

रैभ्य उवाच

कुरूपतां व्रजक्षिप्रं या त्वं सौन्दर्यगर्विता । समागता तपोविघ्नहेतवे मम सन्निधौ

अगस्त्य उवाच

इति शप्तारुषा तेन मुनिना सा शुभेक्षणा । उवाच वनिता भूत्वा प्राञ्जलिर्मुनिमादरात्

उर्वश्युवाच

भगवन्मे प्रसीद त्वं पराधीनायतस्त्वहम् । त्वच्छापस्य कथं मुक्तिर्भवितानियतव्रत

रैभ्य उवाच

अयोध्यायामस्ति तीर्थं पावनंपरमं महत्। तत्रस्नानंकुरुष्वाऽद्यसौन्दर्यम्परमाप्नुहि
त्वन्नाम्नैव च विख्यातिं तोयं यास्यति तद्ध्रुवम् ॥ १०३ ॥

अगस्त्य उवाच

एवंसाविप्रवचसाविदधेसर्वमादरात्। सुन्दरी साऽभवत्क्षिप्रंतत्स्थानंख्यातिमाययौ
अत्र स्नानंमुनिश्रेष्ठ यः कुर्याद्विधिवज्जनः। सौन्दर्यं परमं तस्य भवेत्तत्र न संशयः ॥
भाद्रे शुक्लतृतीयायां यात्रा साम्वत्सरी भवेत्।
विष्णुरत्र जनैः पूज्यः सर्वकामार्थसिद्धये ॥ १०६ ॥
एवंकुर्वन्नरोविद्वान्विष्णुलोकेवसेत्सदा। नरोवा यदिवानारीसर्वान्कामानवाप्नुयात्
घोषार्ककुण्डं परममुर्वशीकुण्डदक्षिणे। वर्तते मुनिशार्दूल! सर्वपापापहं सदा ॥१०८
यत्र स्नानेन दानेन सूर्य्यलोके महीयते। एतत्तीर्थस्य सदृशं नापरं विद्यते क्वचित्
व्रणी कुष्ठी दरिद्री वा दुःखाक्रान्तोऽपि यो नरः।
करोति विधिवत्स्नानं सर्वान्कामानवाप्नुयात् ॥ ११० ॥
रविवारे विशेषेण कर्त्तव्यं स्नानमादरात्।
भाद्रे मासि तथा माघे शुक्लषष्ठ्यां प्रयत्नतः ॥ १११ ॥
कर्त्तव्यंविधिवत्स्नानंसूर्यलोकाभिकाङ्क्षया। पौषेमासि तथा स्नाने सूर्यवारेविशेषतः
सप्तम्यां रवियुक्तायां स्नानं बहुफलप्रदम्। घोषाभिधोऽभवत्पूर्वं सूर्यवंशे नरेश्वरः
समुद्रमेखलामेकः पृथिवीं समपालयत्। यस्यकीर्त्याप्रकाशन्तेत्रिलोकीमण्डलानिवै
यः प्रतापात्स्फुरन्भाति प्रभाकर इवाऽपरः। प्रचण्डतरदोर्दण्डखण्डितारातिमण्डलः
स कदाचित्प्रजापालो मन्त्रिविन्यस्तभूतलः। बभ्राम मृगयासक्तो वनेऽतिगहनद्रुमे
स राजा पूर्वजन्मोत्थपापैरशुभसूचकैः। कृमिव्याप्तकराम्भोजः सुन्दरोऽपि गतस्मयः
मृगयायामभूदेकः कदाचित्पर्यटन्वने। वराहसिंहहरिणान्निघ्नन्गच्छन्नितस्ततः ॥
तृषाक्रान्तोम्लानतनुःसरोपश्यत्पुरो नृपः। ददर्शतत्रच मुनीन्स्नानसन्ध्यादितत्परान्
ततोविधिवदाचम्य स्नानञ्चक्रेनरेश्वरः। ततो दिव्यशरीरोऽभूदानन्दामलमानसः ॥

मुनिभिस्तीर्थमाज्ञाय चक्रेसूर्य्यस्तुतिं प्रियाम् ॥ १२१ ॥

राजोवाच

भगवन्देवदेवेश नमस्तुभ्यं चिदात्मने। नमः सवित्रे सूर्याय जगदानन्ददायिने ॥१२२
प्रभागेहाय देवाय त्रयीभूताय ते नमः। विवस्वते नमस्तुभ्यं योगज्ञाय सदात्मने ॥
पराय परमेशाय त्रिलोकीतिमिरच्छिदे। अचिन्त्याय सदातुभ्यं नमो भास्करतेजसे
योगप्रियाय योगाय योगज्ञाय सदा नमः।
ॐकाराय वषट्कारारूपिणे ज्ञानरूपिणे ॥ १२५ ॥
यज्ञाय यजमानाय हविषे ऋत्विजे नमः। रोगघ्नाय स्वरूपाय कमलानन्ददायिने ॥
अतिसौम्यातितीक्ष्णाय सुराणाम्पतये नमः।
सत्रासायनमस्तुभ्यंभक्तत्राय प्रियात्मने ॥ १२७ ॥
प्रकाशकाय सततं लोकानांहितकारिणे। प्रसीद प्रणतायाऽद्य मह्यं भक्तिकृतेस्वयम्

अगस्त्य उवाच

इत्येवं ब्रुवतस्तस्य स प्रसन्नोरविःस्वयम्। आविर्बभूवसहसा भक्तस्यप्रियकाम्यया
उवाच मधुरं वाक्यं प्रश्रयानतमूर्द्धजम् ॥ १२६ ॥

रविरुवाच

वरम्वरय राजेन्द्र! प्रसन्नोऽस्मि तवाग्रतः। ददामि तद्वरं तेऽद्ययत्त्वयामनसेप्सितम्

राजोवाच

भगवन्भास्कराऽनन्त! प्रयच्छसिवरं यदि। मन्नाम्ना कृतमूर्त्तिस्तेतिष्ठत्वत्रसदाविभो

रविरुवाच

एवमस्तु मनुष्येन्द्रतववाञ्छामनोहरा। एतत्स्तोत्रंत्वयोक्तं मे ये पठिष्यन्तिमानवाः
तेभ्यस्तुष्टः प्रदास्यामि सर्वान्कामान्नरेश्वरः।
तत्तत्स्थानं पराख्यातिं त्वन्नाम्ना यास्यति क्षितौ ॥ १३३ ॥
सर्वान्कामानवाप्नोति योऽत्र स्नानं समाचरेत्। मद्भक्तेनसदाराजन्कर्त्तव्यंस्नानमत्र वै
यं यं काममिहेच्छेत तं तं काममवाप्नुयात् ॥ १३५ ॥

अगस्त्य उवाच

इति दत्त्वा वरंदेवः कृपया परया युतः। भास्वान्सहस्रकिरणस्तदाऽन्तर्द्धानमाययौ राजा भास्करदेहोत्थां रविमूर्त्तिमनुत्तमाम्। तत्रसंस्थापयामासपूजयामासचस्वयम् घोषार्ककुण्डं तन्नाम्ना तत्र ख्यातिंजगामह। यत्र स्नानान्नरो राजन्सूर्य्यलोकेवसेत्सदा

इति रुचिरविधानैस्तूर्णमादित्यमूर्त्तिं विमलपरम भक्त्या पूजयित्वाऽऽदरेण।
तदमृतमयकुण्डे स्नानमादौ विधाय प्रचुरविमलकीर्तिः सूर्यलोकेवसेत्सः ॥१३६

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे ऽयोध्यामाहात्म्ये वृहस्पतिकुण्डरुक्मिणीकुण्डधनयक्षतीर्थवसिष्ठ-कुण्डसागरकुण्डयोगिनीकुण्डोर्वशीकुण्डघोषार्ककुण्डमाहात्म्य वर्णनं नाम सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

रतिकुण्डमहारत्नतीर्थदुर्भरमहामरतीर्थमहाविद्यातीर्थसिद्धपीठक्षीरेश्वर सीताकुण्डसुग्रीवतीर्थहनुमत्कुण्डविभीषणसरस्तीर्थायोध्या यात्राविधिक्रमवर्णनम्

अगस्त्य उवाच

घोषार्कतीर्थाद्विप्रर्षे पश्चिमे दिक्तटे स्थितम्। रतिकुण्डमिति ख्यातं सर्वपापहरं सदा यत्र स्नानेन दानेन परां कान्तिमवाप्नुयात्। तत्पश्चिमदिशाभागे कुसुमायुधनामकम् कुण्डं प्रसिद्धमतुलं सर्वकामार्थसिद्धये। यत्र स्नानेन दानेन कन्दर्पसदृशाकृतिम् ॥

लभते ना विधानेन मुने! नास्त्यत्र संशयः ॥ ३ ॥

रतिकुण्डे तथा विप्र! कुसुमायुधकुण्डके। श्रद्धया कुरुते स्नानं ससौख्यपरमोभवेत्

कुण्डद्वयेऽत्र मिथुनं यत्स्नानं कुरुते किल। रतिकामाविवख्यातौसदातौसुन्दरौतदा तस्मादत्र विधानेन स्नातव्यं धर्मकाङ्क्षिभिः। दानं देयंयथाशक्त्या रतिकन्दर्पतुष्टये भवेतां नियतं तस्य सन्तुष्टौ रतिमन्मथौ। माघे विशदपञ्चम्यांयत्र स्नानंशुभप्रदम् रतिकुण्डे पुरः स्नात्वा पश्चात्कन्दर्प्पकुण्डके। स्नातव्यं तद्दिनेविप्रमिथुनेनप्रयत्नतः

रतिकन्दर्प्पयोः पूजा विधातव्या विशेषतः।
वस्त्रादिभिरलङ्कारैः सम्पूज्यौ द्विजदम्पती ॥ ९ ॥
सर्वान्कामानवाप्नोति नाऽत्र कार्या विचारणा ॥ १० ॥

चन्दनागुरुकर्पूरकस्तुरीकुङ्कुमादिभिः। वासोभिर्विविधैः पुष्पैः पूजयेद्द्विजदम्पती एवं कृते न सन्देहो रतिकन्दर्पतुष्टये। तद्व्रजेन्मिथुनं विप्र! रतिकन्दर्प्पतुल्यताम् ॥

कुसुमायुधकुण्डात्तु प्रतीच्यां दिशि सस्थितम्।
मन्त्रेश्वर इति ख्यातं तत्स्थानं भुवि दुर्लभम् ॥ १३ ॥

तत्र तीर्थे नरः स्नात्वा दृष्ट्वा मन्त्रेश्वरं विभुम्। न तेषांपुनरावृत्तिःकल्पकोटिशतैरपि पुरा रामो देवकार्यं विधायामलकर्मकृत्। कालेन सह सङ्गम्य मन्त्रं चक्रे नरेश्वरः ॥ स्वर्गं प्रति प्रयाणाय यत्रस्नातोजितेन्द्रियः। तत्रैवस्थापितं लिङ्गंमन्त्रेश्वरइतिश्रुतम् तदुत्तरे सरो रम्यं कुमुदोत्पलमण्डितम्। तत्र स्नानं तथा दानं नानाफलदमुत्तमम् चैत्रशुक्लचतुर्दश्यां यात्रा साम्वत्सरी स्मृता। तत्र स्नानेनदानेनब्राह्मणानांचपूजनात्

अक्षयं स्वर्गमाप्नोति नाऽत्र कार्या विचारणा ॥ १८ ॥

मन्त्रेश्वरस्य महिमा नहि केनापि शक्यते। सम्यग्वर्णयितुं विप्र! य उत्तमफलप्रदः ॥

मन्त्रेश्वरसमं लिङ्गं न भूतं न भविष्यति ॥ १९ ॥

सुगन्धिपुष्पधूपादिकुसुमाद्यनुलेपनैः। पूजनीयः प्रयत्नेन सर्वकामार्थसिद्धिदः ॥२०॥ एवं कृते न सन्देहो मुक्तिस्तस्य करे स्थिता। तत्रैवोत्तरभागे तु शीतला वर्ततेऽनघ तां सम्पूज्य नरो विद्वान्सर्वपापैः प्रमुच्यते। सर्वदा पूजनं तस्याःसोमवारेविशेषतः

कर्त्तव्यं सुप्रयत्नेन नृभिः सर्वार्थसिद्धये ॥ २२ ॥

विस्फोटकादिकभये नरैश्च समुपस्थिते। कर्तव्यं पूजनं सम्यग्रोगादिभयनाशनम्

तदुत्तरे तु तत्रैव देवी बन्दीति विश्रुता। यस्याः स्मरणमात्रेण निगडादिभयं नहि

राज्ञा क्रुद्धेन ये बद्धाः शृङ्खलानिगडादिभिः।

बन्दीं संस्मृत्य देवीं तु मुक्ताः स्युस्तत्क्षणाद्धि ते ॥ २१ ॥

यात्रा तस्याः प्रयत्नेन कर्तव्या यत्नतोनरैः। मङ्गलेहिविशेषेणसर्वकामार्थासिद्धिदा

गन्धैःपुष्पैस्तथा धूपैर्दीपैरपि च सुव्रत!। नैवेद्यैर्विविधैर्वाऽपि पूजनीया प्रयत्नतः॥

बन्दीप्रीत्यैमुनिश्रेष्ठ! देयं ब्राह्मणभोजनम्। एवं कृते नसन्देहः सर्वान्कामानवाप्नुयात्

तदुत्तरस्मिंस्तत्रैव चुडकी भुविकीर्त्तिता। वर्ततेपरमासिद्धिरूपिणीस्मरणान्नृणाम्

सुसंदिग्धेषु कार्येषुभयेचसमुपस्थिते। यस्याः स्मरणतो नृणांसर्व सिद्धिःप्रजायते

अग्रे तस्याः सदाकार्यानृभिरङ्गुष्ठतोध्वनिः। दीपदानं प्रयत्नेन कर्त्तव्यंनियतात्मभिः

सर्वाभीष्टप्रदं नृणां दीपदानं प्रशस्यते।

चतुर्दश्यां चतुर्दश्यां तस्या यात्रा विनिर्मिता ॥ ३२ ॥

ततः पूर्वदिशाभागे वर्त्तते तीर्थमुत्तमम्। महारत्नइतिख्यातं सर्वतीर्थोत्तमोत्तमम्॥

यत्र स्नानेनदानेनपूजयाचद्विजन्मनाम्। सर्वकामार्थसिद्धिःस्यान्नात्रकार्याविचारणा

भाद्रे कृष्णचतुर्दश्यां यात्रा साम्वत्सरी स्मृता।

यात्राऽऽस्ते किल मुख्याऽस्य महारत्ना इति श्रुता ॥ ३५ ॥

महारत्नइति ख्यातं तस्मात्तीर्थमनुत्तमम्। तत्र दानं प्रकर्त्तव्यं द्विजसन्तोषकारकम्

नारीभिरपि विप्रर्षे कर्त्तव्यो जागरोत्सवः। वीर्यसौभाग्यसम्पन्नसर्वसौख्यायसर्वदा

तत्र स्नानं प्रयत्नेन कर्त्तव्यं श्रद्धया नरैः ॥ ३७ ॥

ततो नैर्ऋत्यदिग्भागे दुर्भराख्यं सरःशुभम्। वर्तते सुकृतोदारं महाभरसरस्तथा॥

तत्र स्नानादवाप्नोति सदा स्वर्गपदं नरः। धनं बहुविधं देयंवासांसि विविधानि च

शिवपूजाप्रकर्त्तव्या स्नात्वा कुण्डद्वये नरैः। नानाविधेन भावेन भक्त्यापरमयायुतैः

गन्धादिभिः शुभैः पुष्पैरर्च्चनीयो महेश्वरः।

नीलकण्ठोऽन्धकारातिराराध्यो योगिनामपि ॥ ४१ ॥

इति ध्यात्वा शिवंसार्द्धंनिष्पापंप्रयतोनरः। सर्वकामानवाप्याशुशिवलोकेमेवसेत्सदा

एवं कृत्वा नरो विप्र सर्वपापैः प्रमुच्यते। महाभरे वरे तीर्थे तथा दुर्भरसञ्ज्ञके ॥४३

भाद्रकृष्णचतुर्दश्यां यः कुर्याच्छ्रद्धयाऽन्वितः।

शिवपूजाञ्च विधिवद्द्विजपूजां विशेषतः ॥ ४४ ॥

यः करोति नरोभक्त्या शिवलोके स सम्वसेत्। एवंकुर्वन्नरोविद्वान्नमुह्यतिकदाचन

विष्णुरुद्रौ चतस्यातिसुप्रसन्नौ सनातनौ। तयोः स्मरणमात्रेण सर्वपापैः प्रमुच्यते

अतः किं बहुनोक्तेन विप्र! तीर्थमनुत्तमम्। सर्वपापौघशमनं सर्वाभीष्टकरं सदा॥

अतः परं प्रवक्ष्यामि तीर्थमन्यच्छुभावहम्।

यत्र यात्रा तथा दानं विना भाग्यं न सम्भवेत् ॥ ४८ ॥

ईशानेदुर्भरस्थानान्महाविद्याभिधंमहत्। तस्यदर्शनतोनृणांसिद्धयःस्युःकरेस्थिताः

तदग्रे सरसि स्नात्वा महाविद्यां तु यो नरः।

पश्यति श्रद्धया भक्तया स याति परमां गतिम् ॥ ५० ॥

सिद्धपीठंतथाख्यातंसम्यक्प्रत्ययकारकम्। तत्र पूजाविधातव्याभक्त्यापरमयाद्विज!

मन्त्रं यः श्रद्धया विप्र शैवंशाक्तमथापिवा। गाणपत्यं वैष्णवं वा तत्र यः प्रयतोनरः

एकाग्रमानसोविद्वन्नाराध्यावर्तयेत्सदा। तस्यसिद्धिर्भवेन्नित्यं चमत्कारोभवेद्द्विज

तस्मादत्रप्रकर्तव्यं जपादिकमतन्द्रितैः। अष्टम्याञ्चनवम्याञ्चयात्रास्यात्प्रतिमासिकी

देयान्यन्नानि बहुशो नानाविधफलानिच। क्षीरेण स्नपनं कार्यं पूजनीया प्रयत्नतः॥

उच्चाटनादीन्यपि च मोहनादिविशेषतः। अत्रस्थानेविशेषेणदुष्टमन्त्रोऽपिसिध्यति

सिद्धस्थाने परं मोक्षं वशीकरणमुत्तमम्।

जपो होमस्तथा दानं सर्वमक्षयतां व्रजेत् ॥ ५७ ॥

आश्विने शुक्लपक्षस्य नवरात्रिषु सुव्रत!। यत्र गत्वा नरो विप्र! सर्वपापैः प्रमुच्यते

यदा पूर्वं विनिर्जित्य रावणं लोकरावणम्। समागतोरघुपतिः सीतालक्ष्मणसंयुतः

यत्र गत्वा यदा वीरो भरतोरामकाङ्क्षया। स्थितः सानुचरःश्रीमाञ्छ्रियापरमयायुतः

तत्रागमत्सुरगवी प्रादुर्भूता स्रवत्स्तनी। तत्स्तनेभ्यःप्रसुस्राव दुग्धं बहुगुणाधिकम्

तद्भूमिपतितं दुग्धं दृष्ट्वा वानरराक्षसाः। विस्मयं परमं जग्मुः पप्रच्छुस्ते चराचरम्

किमेतदिति राजेन्द्र! तानुवाच रघूद्वहः । वसिष्ठो वेत्तितत्सर्वं पृच्छामस्तंमुनिवयम्
इत्युक्तास्तु ततःसर्वेवसिष्ठप्रमुखेस्थिताः । ते पप्रच्छुः प्राञ्जलयः कृत्वाचाग्रेसरंनृपम्

वसिष्ठोऽपि क्षणं ध्यात्वा तमुवाच निराकुलम् ।
राघवम्प्रति सम्बोध्य सर्वेषामग्रतो मुनिः ॥ ६५ ॥

वसिष्ठ उवाच

श्रृणुराम महाबाहो कामधेनुरियं शुभा । समागता तव स्नेहात्प्रस्रवन्ती स्तनात्पयः
दुग्धमध्येसमुद्भूतो रुद्रस्त्वांद्रष्टुमागतः । निष्पन्नकार्यं देवानांनिर्जितारातिमुत्तमम्
इमं सम्पूजय क्षिप्रमेतत्कुण्डस्य सन्निधौ । शीघ्रं त्वमपि यत्नेन पूजयेमंशिवंशुभम्

दुग्धेश्वरमितिख्यातं क्षीरकुण्डे पवित्रकम् ॥ ६८ ॥

अगस्त्य उवाच

ततो रघुपतिः श्रीमान्वसिष्ठोक्तविधानतः । पूजयामासतल्लिङ्गंदुग्धेश्वरमिति स्मृतम्
सीतयासत्कृतंयस्मात्तत्कुण्डंक्षीरसङ्गमम् । सीताकुण्डमितिख्यातिंजगामानुपमांततः
सीताकुण्डेनराः स्नात्वादृष्ट्वादुग्धेश्वरंप्रभुम् । सर्वपापैःप्रमुच्यन्तेनात्रकार्याविचारणा
अत्रस्नानंजपोहोमोदानञ्चाक्षयताम्व्रजेत् । सीताकुण्डेतुसम्पूज्यसीतारामौसलक्ष्मणौ

दुग्धेश्वरञ्च सम्पूज्य सर्वान्कामानवाप्नुयात् ।
जेष्ठेमासि चतुर्दश्यां यात्रा साम्वत्सरी स्मृता ॥ ७३ ॥

एवं यो विधिवत्कुर्याद्धयाधर्मविशारदः । स याति परमं स्थानं यत्र गत्वा नशोचति
तत्र पूर्वादिशाभागे सुग्रीवरचितं महत् । तीर्थं तपोनिधेस्तत्र वर्तते सन्निधौ शुभम्
यत्रस्नात्वाचदत्त्वाचरामंसम्पूज्ययत्नतः । तस्मिन्नेवदिनेतत्रसर्वान्कामानवाप्नुयात्

तत्प्रत्यग्दिशि वै स्थानं हनुमत्कुण्डमित्यपि ।
तस्य पश्चिमतो विप्र! विभीषणसरः शुभम् ॥ ७७ ॥

तयोः स्नानेन दानेन रामसम्पूजनेन च । सर्वान्कामानवाप्नोति तस्मिन्नेवविधानतः

इयं सा परमा मेध्याऽयोध्या धर्मनिधिः स्मृता ॥ ७८ ॥
इत्युक्तास्तुततः सर्वे वसिष्ठमुनिमादरात् ।

पप्रच्छुर्विनयात्क्षिप्रं विभीषणपुरःसराः । कथयस्व तपोराशे! कथामेतांसुदुर्ल्लभाम्

अयोध्यायाः परम्विप्र माहात्म्यं कथयन्ति यत् ।
तत्सर्वं कथय क्षिप्रं श्रुत्वा माहात्म्यमुत्तमम् ॥ ८० ॥

यथा यात्रांविधास्यामःक्रमेणचविधानतः । तदस्मासुकृपां कृत्वा कथयस्वतपोनिधे

वसिष्ठ उवाच

श्रृण्वन्तुमुनयःसर्वे अयोध्यामहिमाद्भुतम् । यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्र संशयः
इदं गुह्यतरं क्षेत्रमयोध्याभिधमुत्तमम् । सर्वेषामेव भूतानां हेतुर्मोक्षस्य सर्वदा ॥८३

अस्मिन्सिद्धाः सदा देवा वैष्णवं व्रतमास्थिताः ।
नानालिङ्गधरा नित्यं विष्णुलोकाभिकाङ्क्षिणः ॥ ८४ ॥

अभ्यस्यन्तिपरंयोगंयुक्तप्राणाजितेन्द्रियाः । नानावृक्षसमाकीर्णेनानाविहगवासिनि
कमलोत्पलशोभाढ्ये सरोभिः समलङ्कृते । अप्सरोगणसङ्कीर्णे सर्वदा सेवितेशुभे
रोचतेहिसदावासःक्षेत्रेनित्यंहरेरिह । मन्यमानाविष्णुभक्ताविष्णौ सर्वेऽर्पितक्रियाः
यथामोक्षमिहायान्तिनान्यत्र हि तथा क्वचित् । अथ श्रेष्ठतमं क्षेत्रंयस्माच्चवसतिर्हरेः

महाक्षेत्रमिदं यस्मादयोध्याभिधमुत्तमम् ॥ ८८ ॥

नैमिषे च कुरुक्षेत्रे गङ्गाद्वारे च पुष्करे । स्नानात्संसेवनाद्वाऽपि न मोक्षः प्राप्यतेतथा
इह सम्प्राप्ते यद्वत्तत एव विशिष्यते । प्रयागे वा भवेन्मोक्ष इह वा हरिसंश्रयात् ॥

सर्वस्मादपि तीर्थाग्र्यादिदमेव महत्स्मृतम् ॥ ९० ॥

अव्यक्तलिङ्गैर्मुनिभिःसर्वैःसिद्धैर्महर्षिभिः । इहसम्प्राप्यतेमोक्षोदुर्ल्लभोऽन्यत्रयोमतः
तेभ्यःप्रयच्छतिहरिर्योगमैश्वर्यमुत्तमम् । आत्मनश्चैवसायुज्यमीप्सितंस्थानमुत्तमम्
ब्रह्मादेवर्षिभिःसार्द्धंश्रीश्चवायुर्दिवाकरः । देवराजस्तथाशक्रो ये चान्येऽपिदिवौकसः
उपासते महात्मनः सर्वत्र हरिमादरात् । अन्येऽपियोगिनः सिद्धा क्षेत्ररूपामहाव्रताः
अनन्यमनसो भूत्वा सर्वदोपासतेहरिम् । विषयासक्तचित्तोऽसि त्यक्तधर्म रतिर्नरः

इह क्षेत्रे मृतः सोपि संसारी न पुनर्भवेत् ॥ ९५ ॥

ये पुनर्निगमाधीनाःसत्रस्थाविजितेन्द्रियाः । व्रतिनश्चनिरारम्भाःसर्वे तेहरिभाविताः

देहभङ्गं समापद्य धीमन्तः सङ्गवर्जिताः । गतास्ते च परं मोक्षं प्रसादात्सर्वदा हरेः
जन्मान्तरसहस्रेषु युञ्जन्योगी न चाऽऽप्नुयात् । तमिहैव परंमोक्षंमरणादपिगच्छति
एतत्सङ्क्षेपतो वच्मि क्षेत्रस्य महिमाद्भुतम् । एतदेव परं स्थानमेतदेव परम्परदम् ॥
एतादृङ्नापरं स्थानं पुनरन्यत्र दृश्यते ॥ ९९ ॥
यत्रगत्वाप्रयत्नेनयात्रापुण्याभिकाङ्क्षिभिः । कर्तव्याविधिवद्धीराः क्रमेणश्रद्धयान्वितैः
प्रथमेऽहनि कर्त्तव्य उवपासो यतात्मभिः । नियमेन ततः स्नानं दानञ्चैव स्वशक्तितः
उपावृत्तस्तु पापेभ्योयस्य वासोगुणैः सह ।
उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥ १०२ ॥
उपवासं विधायाऽसौ चक्रतीर्थे नरः कृती । उपवासदिनेस्नायाद्दद्याच्चैवस्वशक्तितः
विप्रं सम्पूज्य विधिवत्पश्येद्विष्णुहरिं विभुम् ।
स्वर्गद्वारे नरः स्नात्वा विष्णुं सम्पूज्य यत्नतः ॥ १०४ ॥
क्षौरञ्च कारयेत्तत्र व्रतीधर्माभिधे ततः । पापमोचनके स्नानमृणमोचनके ततः १०५
स्नात्वा सहस्रधारायां शेषंसम्पूज्य यत्नतः । दृष्ट्वा चन्द्रहरिं देवं ततोधर्महरिंविभुम्
ततश्चक्रहरिं दृष्ट्वा दद्याच्चैव स्वशक्तितः । ब्रह्मकुण्डे नरः स्नात्वा सर्वकामार्थसिद्धये
महाविद्यासमीपे तु रात्रौ जागरणं चरेत् ॥ १०७ ॥
ततः प्रभाते विमले पुनरुत्थाय सद्व्रती । स्वर्गद्वारे प्रयत्नेन विधिवत्स्नानमाचरेत्
श्राद्धञ्च विधिवत्कृत्वा दत्त्वा चैव स्वशक्तितः ।
विष्णुं सम्पूज्य विधिवद्विप्रानपि पुनः पुनः ॥ १०९ ॥
दम्पती च प्रयत्नेनपूज्यौवस्त्रादिभिस्तथा । श्रद्धया परया युक्तैर्दातव्याभूरिदक्षिणा
विप्रान्सम्पूज्य विधिवद्भुञ्जीत प्रयतोनरः ॥ १११ ॥
अन्येद्युरपि चोत्थाय श्रद्धयापरयायुतः । रुक्मिणीप्रभृतीन्यत्रपश्येत्तीर्थानिचक्रमात्
तत्र तत्र नरः स्नात्वा दत्त्वा चैव स्वशक्तितः ।
विष्णुं सम्पूज्य यत्नेन मनोवाक्कायनिर्मलः ॥ ११३ ॥
यात्रां समापयेत्सम्यङ्नियतात्माशुचिव्रतः । यत्रक्वापिमृतोधीरःपरंमोक्षमवाप्नुयात्

अगस्त्य उवाच

वसिष्ठोक्तमिति श्रुत्वाकृत्वाचैवयथाविधि । विभीषणपुरोगास्ते बभूवुर्निर्मलास्तदा
इति बहुलविधानैस्तीर्थयात्रां विधाय प्रचुरसुकृतपूर्णास्ते च सुग्रीवमुख्याः ।
गतमलिनसुदेहाः स्वर्गचर्याप्रयत्नादुपगुणितगुणौघास्ते बभूवुः समस्ताः ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीयेवैष्णवखण्डे-
ऽयोध्यामाहात्म्ये रतिकुण्डमहारत्नतीर्थदुर्भरमहाभरतीर्थमहाविद्यातीर्थ
सिद्धपीठक्षीरेश्वरसीताकुण्डसुग्रीवतीर्थहनुमत्कुण्डविभीषण-
सरस्तीर्थायोध्यायात्राविधिक्रमवर्णनंनामाष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

गयाकूपपिशाचमोचनमानसतीर्थतमसानदीमाण्डव्याद्याश्रमसीता-कुण्डदुग्धेश्वरभैरवभरतकुण्डजयकुण्डमाहात्म्यवर्णनम्

अगस्त्य उवाच

जटाकुण्डत आग्नेयदिग्दले संश्रितं महत् । गयाकूपमिति ख्यातं सर्वाभीष्टफलप्रदम्
यत्रस्नात्वाच दत्त्वाचयथाशक्त्याजितेन्द्रियः । सर्वकाममवाप्नोतिश्राद्धंकृत्वाद्विजोत्तमः
नरकस्थाश्च ये केचित्पितरश्च पितामहाः ।
विष्णुलोकेतु गच्छन्ति तस्मिञ्छ्राद्धे कृते तु वै ॥ ३ ॥
तस्मिञ्छ्राद्धेकृते विप्रपितॄणामनृणोभवेत् । शक्तिभिः पिण्डदानन्तुसयवैःपायसेनच
कर्त्तव्यमृषिनिर्दिष्टं पिण्याकेनगुणेनवा । श्राद्धं तत्तीर्थके प्रोक्तं पितॄणां तुष्टिकारकम्
तत्रश्राद्धं प्रकर्त्तव्यं नरैः श्रद्धासमन्वितैः । तुष्यन्ति पितरस्तेषांतुष्टाःस्युःसर्वदेवताः
तुष्टेषु पितृषु श्रीमाञ्जायते पुत्रवांस्तथा । श्राद्धेन पितरस्तुष्टाःप्रयच्छन्तिसुतान्बहून्
श्रियश्च विपुलान्भोगाञ्छ्राद्धकृद्भ्यो न संशयः ।

तस्मादत्र विधानेन विधातव्यं प्रयत्नतः ॥ ८ ॥

श्राद्धं श्रद्धायुतैः सम्यगभीष्टफलकाङ्क्षिभिः । गयाकूपे विशेषेण पितृणां दत्तमक्षयम् सोमवारेण संयुक्ता अमावास्या यदाभवेत् । तत्रानन्तफलं श्राद्धं पितृणांदत्तमक्षयम् अन्यदा सोमवारेण तत्र श्राद्धं विधानतः । पितृसन्तोषदं नित्यं तत्रदत्ताक्षयोभवेत् तत्र पूर्वदिशाभागे तीर्थं सर्वोत्तमोत्तमम् । पिशाचमोचनंनाम विद्यते च फलप्रदम् तत्र स्नात्वा च दत्त्वा च पिशाचोनैवजायते । तत्रस्नानंतथादानंश्राद्धञ्चैव विशेषतः

कर्त्तव्यञ्च प्रयत्नेन नरैः श्रद्धासमन्वितैः ॥ १३ ॥

मार्गशीर्षे शुक्लपक्षे चतुर्दश्यां विशेषतः । स्नानं तत्र प्रकर्तव्यं पिशाचत्वविमुक्तये ॥ तत्सन्निधौ पूर्वभागे मानसंनाम नामतः । तीर्थं पुण्यनिवासाढ्यंस्नातव्यञ्च विशेषतः

तत्र स्नानेन दानेन सर्वान्कामानवाप्नुयात् ।

नानाविधानि पापानि मेरुतुल्यानि वै पुनः ॥

तत्र स्नानात्क्षयं यान्ति नाऽत्र कार्या विचारणा ॥ १६ ॥

यत्किञ्चिद्विद्यतेपापंमानसंकायिकं तथा । वाचिकञ्चतथापापंस्नानतोविलयम्व्रजेत् प्रौष्ठपद्यांसदाकार्य्यापौर्णमास्यांविशेषतः । यात्रातस्यनृभिर्विप्रपुण्यवर्द्धिक्रियापरैः तस्माद्दक्षिणदिग्भागे वर्त्तते सुकृतैकभूः । तमसानाम तटिनी महापातकनाशिनी ॥ यत्र स्नानं तथा दानं सर्वपापहरं सदा । यस्यास्तटेतथा रम्ये सर्वदा फलदायके ॥

नानाविधानि स्थानानि मुनीनां भावितात्मनाम् ।

माण्डव्यस्य मुने! स्थानं वर्त्तते पापनाशनम् ॥ २१ ॥

यस्यास्तीरे मुनिश्रेष्ठ! सर्वत्र सुमनोहरम् । तस्याऽऽश्रमपदं रम्यं नानावृक्षमनोहरम् यस्मात्स्थानात्समुद्भूता तमसा सुतरङ्गिणी । तद्वनं पुण्यमधिकं पावनं पदमुत्तमम्

यस्य दर्शनतो नृणां सर्वपापक्षयो भवेत् ॥ २४ ॥

प्रफुल्लनानाविधगुल्मशोभितं लताप्रतानावनतं मनोहरम् ।

विरूढपुष्पैः परितः प्रियङ्गुभिः सुपुष्पितैः कण्टकितैश्च केतकैः ॥ २५ ॥

तमालगुल्मैर्निचितं सुगन्धिभिः सकर्णिकारैर्बकुलैश्च सर्वतः ।

अशोकपुन्नागवरैः सुपुष्पितैर्द्विरेफमालाकुलपुष्पसञ्चयैः ॥ २६ ॥

क्वचित्प्रफुल्लाम्बुजरेणुरूषितैर्विहङ्गमैश्चारुफलप्रचारिभिः ।

विनादितं सारसमुत्कुलादिभिः प्रमत्तदात्यूहकुलैश्चवल्गुभिः ॥ २७ ॥

क्वचिच्च चक्राह्वरवोपनादितं क्वचिच्च कादम्बकदम्बकैर्युतम् ।

क्वचिच्च कारण्डवनादनादितं क्वचिच्च मत्तालिकुलाकुलीकृतम् ॥ २८ ॥

मदाकुलाभिर्भ्रमरीभराराञ्चिषेवितं चारुसुगन्धिपुष्पवत् ।

क्वचिच्च पुष्पैः सहकारवृक्षैर्लतोपगूढैस्तिलकद्रुमैश्च ॥ २९ ॥

प्रहृष्टनानाविधपक्षिसेवितं प्रमत्तहारीतकुलोपनादितम् ।

समन्ततः सुन्दरदर्शनीयतां समुद्वहत्तद्वनमुल्लसन्महत् ॥ ३० ॥

निबिडनिचुलनीलं नीलकण्ठाभिरामं मदमुदितविहङ्गीवृन्दनादाभिरामम्

कुसुमिततरुशाखालीनमत्तद्विरेफं नवकिसलयशोभाशोभितंसत्फलाढ्यम्

इत्यादिबहुशोभाढ्यं सर्वदिक्षु मनोहरम् । यत्र माण्डव्यमुनिनातपस्तप्तं महत्किल

यत्प्रभावादभूत्तीर्थं पावनं तत्सदा महत् ॥ ३२ ॥

तत्पूर्वं गौतमस्यर्षेराश्रमं पावनं महत् । तत्पूर्वं च्यवनस्यर्षेः पराशरमुनेरिदम् !

प्रथमं ते मुनिश्रेष्ठ! पितुः किल तपोनिधेः ॥ ३३ ॥

नानाविधानि तीर्थानि चाश्रमाश्चैवसर्वशः । वर्तन्तेतापसानाञ्चयस्यास्यीरेसमन्ततः तमसानाम सा ज्ञेया वर्तते तटिनी शुभा । यज्ञयूपान्समुत्थाय शोभिताबहुशोऽभितः तत्र स्नानेन दानेनश्राद्धेनचविशेषतः । सर्वकामार्थसिद्धिःस्याद्याऽत्रकार्याविचारणा मार्गशीर्षे शुक्लपक्षे पञ्चदश्यां विशेषतः । स्नानं तस्य फलप्राप्तिदायकं सर्वदा नृणाम् तस्मादत्र प्रकर्तव्यं स्नानं निर्मलमानसैः । प्रयत्नतो मुनिश्रेष्ठ! सर्वकामार्थसिद्धिदम् अतः परं प्रवक्ष्यामि तमसापरमंशुभम् । सीताकुण्डमितिख्यातंश्रीदुग्धेश्वरसन्निधौ भाद्रेशुक्लचतुर्थ्यांतुतस्ययात्राशुभावहा । सर्वकामार्थसिद्ध्यर्थं पूज्योविघ्नेश्वरस्तथा

तस्य स्मरणमात्रेण सर्वविघ्नविनाशनम् ॥ ४० ॥

तस्माद्दक्षिणदिग्भागे भैरवो नाम नामतः । यं दृष्ट्वा सर्वपापेभ्यो मुच्यतेनात्रसंशयः

रक्षितो वासुदेवेन क्षेत्ररक्षार्थमादरात् । तस्यपूजा विधातव्या प्रयत्नेन यथाविधि ॥
मनोऽभीष्टफलप्राप्तिर्भैरवस्य सदाऽऽदरात् ॥ ४२ ॥
मार्गशीर्षस्यकृष्णायामष्टम्यांतस्यनिर्मिता । यात्रासाम्वत्सरीतत्रसर्वकामार्थसिद्धये
पशूपहारसम्भूति कर्त्तव्यं पूजनं जनैः । सर्वकामफलप्राप्तिर्जायते नाऽत्र संशयः ॥४४
निर्विघ्नं तीर्थवसतिर्भैरवस्य प्रसादतः । जायते तेन कर्तव्या पूजा तस्य प्रयत्नतः ॥
एतस्मिन्नुत्तरे भागे रम्यं भरतकुण्डकम् ।
यत्र स्नात्वा नरः पापैर्मुच्यते नात्र संशयः ॥ ४५ ॥
तत्र स्नानं तथादानं सर्वमक्षयतां व्रजेत् । अन्नं वहुविधं देयंवासांसिविविधान्यपि
यत्नतो देवताः पूज्या वस्त्रादिभिरलङ्कृतैः । नन्दिग्रामे वसन्पूर्वं भरतोरघुवंशजः
रामचन्द्रं हृदि ध्यायन्निर्मलात्मा जितेन्द्रियः ।
ततः स्थित्वा प्रजाः सर्वा ररक्ष क्षितिवल्लभः ॥ ४६ ॥
तत्र चक्रे महत्कुण्डं भरतोनाम भूपतिः । राममूर्तिं च संस्थाप्यचचारविजितेन्द्रियः
तत्कुण्डे सुमहत्पुण्यं नानापुण्यसमन्वितम् ।
कुमुदोत्पलकह्लारपुण्डरीकसमन्वितम् ॥ ५१ ॥
हंससारसचक्राह्वविहङ्गमविराजितम् । उद्यानपादपच्छायासच्छायमम्लं सदा ॥५२
तत्र स्नानं महापुण्यं प्रमोदानन्दनिर्मलम् । तत्र स्नानं तथा श्राद्धं पितॄनुद्दिश्य कुर्वतः
पितरस्तस्य तुष्यन्ति तुष्टाः स्युः सर्वदेवताः ॥ ५३ ॥
स्वर्णं चाऽन्नं विधानेन दातव्यं च द्विजन्मने । श्रद्धापूर्वकमेतत्तु कर्तव्यं प्रयतैर्नरैः ५४
तत्पश्चिमदिशाभागे जटाकुण्डमनुत्तमम् । यत्र रामादिभिः सर्वैर्जटाःपरिहृता निजाः
जटाकुण्डमिति ख्यातं सर्वतीर्थोत्तमोत्तमम् ।
यत्र स्नानेन दानेन सर्वान्कामानवाप्नुयात् ॥ ५६ ॥
पूर्वकुण्डेषु सम्पूज्योभरतःश्रीसमन्वितः । जटाकुण्डेषुसम्पूज्यौसर्सीतौरामलक्ष्मणौ
चैत्रकृष्णचतुर्दश्यां यात्रा साम्वत्सरी भवेत् ॥ ५७ ॥
इति परमविधानैः पूजयेद्रामसीते तदनु भरतकुण्डे लक्ष्मणं च प्रपूज्य ।

विधिवदमृतकुण्डे द्वन्द्वसम्मज्जनेन वसति सुकृतिमूर्तिर्वैष्णवे तत्रलोके ॥५८
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे-
ऽयोध्यामाहात्म्ये गयाकूपपिशाचमोचनमानसतीर्थतमसानदीमाण्डव्याद्या-
श्रमसीताकुण्डदुग्धेश्वरभैरवभरतकुण्डजटाकुण्डमाहात्म्य-
वर्णनंनामनवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

अयोध्यायात्राविधिक्रमवर्णनम्

अगस्त्य उवाच

निराहारो नरो भूत्वा श्रीराहारोऽपि वा पुनः ।
अजितं पूजयेद्विप्र! तस्य सिद्धिः करे स्थिता ॥ १ ॥
महोत्सवस्तु कर्तव्योगीतवादित्रसंयुतः । एवं यःकुरुतेधीमान्सर्वान्कामानवाप्नुयात्
एतस्मादुत्तरे विद्धन्वीरस्य शुभसूचकम् । स्थानं मत्तगजेन्द्रस्य वर्तते नियतव्रत! ॥
तदग्रे सरसिस्नात्वावसेत्तत्रसुनिश्चितम् । पूर्णांसिद्धिमवाप्नोतियामवाप्यनशोचति
अयोध्यारक्षको वीरःसर्वकामार्थसिद्धिदः । नवरात्रिषुपञ्चम्यांयात्रासाम्वत्सरीभवेत्
गन्धपुष्पधूपादिनैवेद्यादिविधानतः । पूजनीयः प्रयत्नेन सर्वकामार्थसिद्धिदः ॥
यंयं काममिहेच्छेत तं तं काममवाप्नुयात् ॥ ६ ॥
एतस्माद्दक्षिणे भागे सुरसानाम राक्षसी । विष्णुभक्ता सदाविप्रवर्ततेसिद्धिदायिका
तां सम्पूज्य नरो भक्त्या सर्वान्कामानवाप्नुयात् ॥ ८ ॥
लङ्कास्थानादिहानीतारामेणोत्कृष्टकर्मणा । अयोध्यायांस्थापितासारक्षार्थंनियतव्रतैः
सम्पूज्यविधिवत्तस्यादर्शनंकार्यमादरात् । सर्वकामार्थसिद्ध्यर्थमुत्सवोऽपिशुभप्रदः
कर्त्तव्यः सुप्रयत्नेन गीतवादित्रसंयुतैः ॥ १० ॥

नवरात्रे तृतीयायां यात्रा साम्वत्सरीभवेत् । सर्वदा सुखसन्तानसिद्धये परमार्थदा

नानासङ्गीतवादित्रनृत्योत्सवमनोहरा ॥ ११ ॥

एवं कृते न सन्देहः सर्वदा रक्षितो भवेत् ॥ १२ ॥

एतत्पश्चिमदिग्भागे वर्तते परमो मुने! । पिण्डारक इति ख्यातो वीरःपरमपौरुषः ॥

पूजनीयः प्रयत्नेन गन्धपुष्पाक्षतादिभिः ॥ १३ ॥

यस्य पूजावशान्नृणां सिद्धयः करसंश्रिताः । तस्य पूजाविधानेन कर्तव्यं पूजनंनरैः

सरयूसलिले स्नात्वा पिण्डारकश्चपूजयेत् । पापिनांमोहकर्त्तारंमतिदं कृतिनांसदा

तस्य यात्राविधातव्यासपुण्यानवरात्रिषु । तत्पश्चिमदिशाभागे विघ्नेशंकिलपूजयेत्

यस्य दर्शनतो नृणां विघ्नलेशोन विद्यते । तस्माद्विघ्नेश्वरः पूज्यः सर्वकामफलप्रदः

तस्मात्स्थानत ऐशाने रामजन्मप्रवर्त्तते । जन्मस्थानमिदंप्रोक्तंमोक्षादिफलसाधनम्

विघ्नेश्वरात्पूर्वभागेवासिष्ठादुत्तरेतथा । लोमशात्पश्चिमेभागेजन्मस्थानंततःस्मृतम्

यद्दृष्ट्वा च मनुष्यस्य गर्भवासजयोभवेत् ।

विना दानेन तपसा विना तीर्थैर्विना मखैः ॥ २० ॥

नवमीदिवसे प्राप्ते व्रतधारी हि मानवः । स्नानदानप्रभावेण मुच्यते जन्मबन्धनात् ॥

कपिलागोसहस्राणि यो ददातिदिनेदिने । तत्फलं समवाप्नोति जन्मभूमेःप्रदर्शनात्

आश्रमे वसतां पुंसां तापसानाञ्च यत्फलम् । राजसूयसहस्राणि प्रतिवर्षाग्निहोत्रतः

नियमस्थं नरं दृष्ट्वा जन्मस्थाने विशेषतः । मातापित्रोर्गुरूणाञ्चभक्तिमुद्वहतांसताम्

तत्फलं समवाप्नोति जन्मभूमेः प्रदर्शनात् ॥ २५ ॥

अथ सरयूवर्णनम्

पितृणामक्षया तृप्तिर्गयाश्राद्धाधिकं फलम् ॥ २६ ॥

मन्वन्तरसहस्रैस्तु काशीवासेषुयत्फलम् । तत्फलंसमवाप्नोति सरयूदर्शने कृते ॥

गयाश्राद्धश्च ये कृत्वा पुरुषोत्तमदर्शनम् । कुर्वन्ति तत्फलं प्रोक्तं कलौदाशरथींपुरीम्

मथुरायां कल्पमेकं वसते मानवो यदि । तत्फलं समवाप्नोति सरयूदर्शने कृते ॥२६

पुष्करेषु प्रयागेषु माघे वा कार्त्तिके तथा । तत्फलं समवाप्नोति सरयूदर्शने कृते ॥

कल्पकोटिसहस्राणि ह्यवन्तीवासतो हि यत् ।

तत्फलं समवाप्नोति सरयूदर्शने कृते ॥ ३१ ॥

षष्टिवर्षसहस्राणि भागीरथ्यवगाहजम् । तत्फलं निमिषार्द्धेन कलौ दाशरथीं पुरीम्

निमिषं निमिषार्द्धं वा प्राणिनां रामचिन्तनम् । संसारकारणाज्ञाननाशकंजायतेध्रुवम्

यत्र कुत्र स्थितो ह्यस्तु ह्ययोध्यां मनसा स्मरेत् ।

न तस्य पुनरावृत्तिः कल्पान्तरशतैरपि ॥ ३४ ॥

जलरूपेण ब्रह्मैव सरयूर्मोक्षदा सदा । नैवाऽत्र कर्मणोभोगो रामरूपो भवेन्नरः ॥३५

पशुपक्षिमृगाश्चैव ये चान्ये पापयोनयः । तेऽपि मुक्ता दिवं यान्ति श्रीरामवचनंयथा

इत्युक्त्वा विरते तस्मिन्मुनौ कलशजन्मनि । कृष्णद्वैपायनव्यासःपुनरूचे तपोधनः

दुर्लभा सर्वजन्तूनां कथा विस्तरतः क्रमात् ।

यात्राक्रमोऽपिच मया श्रुत आगच्छतां नृणाम् ॥ ३८ ॥

इदानींश्रोतुमिच्छामिक्षेत्रस्यानंयथाविधि । यात्राक्रमंमुनिश्रेष्ठसम्यक्त्वत्तस्तपोधन

फलम्ब्रूहि क्रमेणैवविस्तरात्पृच्छतो मम । यद्यस्तिमयिते विद्वन्कृपाकारुणिकोत्तम

यथा श्रुत्वा क्रमेणैव यात्रां विश्वविदाम्वर! । करोमि त्वत्प्रसादेन तथाकुरुयतव्रत!

अगस्त्य उवाच

शृणु वक्ष्यामितत्त्वेनयात्राक्रममथादितः । अयोध्यां सप्ततीर्थानां यथावदनुपूर्वशः

मनोवाक्कायशुद्धेन निर्दोषेणान्तरात्मना । मानसेषु सुतीर्थेषु स्नात्वाकिल जितेन्द्रियः

यः करोति विधिं सम्यक्स तीर्थफलमश्नुते ॥ ४३ ॥

व्यास उवाच

मानसान्येव तीर्थानि कथयस्वतपोधन! । येषुस्नातवतां नृणां विशुद्धिर्मनसोभवेत्

अगस्त्य उवाच

शृणुतीर्थानिगदतोमानसानिममानघ! । येषु सम्यङ्नरः स्नात्वाप्रयातिपरमांगतिम्

सत्यतीर्थं क्षमातीर्थं तीर्थमिन्द्रियनिग्रहः । सर्वभूतदयातीर्थं तीर्थानां सत्यवादिता

ज्ञानतीर्थं तपस्तीर्थं कथितं तीर्थसप्तकम् । सर्वभूतदयातीर्थे विशुद्धिर्मनसो भवेत् ॥

नतोयपूतदेहस्यस्नानमित्यभिधीयते । स स्नातो यस्य वै पुंसः सुविशुद्धंमनोगतम्

भौमानामपि तीर्थानां पुण्यत्वे कारणं शृणु ॥ ४८ ॥

यथा शरीरस्योद्देशाः केचिन्मध्योत्तमाः स्मृताः ।

तथा पृथिव्यामुद्देशाः केचित्पुण्यतमाः स्मृताः ४९ ॥

तस्माद्भौमेषु तीर्थेषु मानसेषु च सम्वसेत् । उभयेषुचयःस्नाति स यातिपरमांगतिम्

तस्मात्त्वमपिविप्रेन्द्र विशुद्धेनान्तरात्मना । यात्रांकुरुप्रयत्नेन यात्रा वै नोदितामया

तं तु वक्ष्यामि विप्रेन्द्र! तीर्थयात्राविधिं क्रमात् ॥ ५१ ॥

जायन्ते च जलेष्वेवम्रियन्तेचजलौकसः । न च गच्छन्तिते स्वर्गमशुद्धमनसोमलाः

विषयेष्वनिशं रागो मनसो मल उच्यते । तेष्वेव हि न सङ्गस्य नैर्मल्यं समुदाहृतम्

चित्तमन्तर्गतं दुष्टं तीर्थस्नानं न शुध्यति । शतशोऽपि जलैर्धौतं सुराभाण्डमपावनम्

दानमिज्या तपः शौचं तीर्थसेवा श्रुतिस्तथा ।

सर्वाण्येतानि तीर्थानि यदि भावेन निर्मलः ॥ ५५ ॥

निगृहीतेन्द्रियग्रामो यत्रैव वसते नरः । तत्र तस्य कुरुक्षेत्रं नैमिषं पुष्करं तथा ॥

एतत्ते कथितं विप्र! मानसं तीर्थलक्षणम् ।

स्नाते यस्मिन्क्रियाः सर्वाः सफलाः स्युः क्रियावताम् ॥ ५७ ॥

प्रातरुत्थाय मतिमान्सङ्गमे स्नानमाचरेत् ।

विभं विष्णुहरिं दृष्ट्वा स्नायाद्वै ब्रह्मकुण्डके ॥ ५८ ॥

चक्रतीर्थे नरः स्नात्वा दृष्ट्वा चक्रहरिं विभुम् । ततो धर्महरिंदृष्ट्वा सर्वपापैः प्रमुच्यते

एकादश्यामेकादश्यामियं यात्रा शुभावहा । प्रातरुत्थाय मतिमान्स्वर्गद्वारजलाप्लुतः

विधाय नित्यजं कर्म अयोध्यां च विलोकयेत् । सरयूं तु ततोदृष्ट्वापश्येन्मत्तगजंततः

वन्दीश्च शीतलांश्चैवबटुकश्चविलोकयेत् । तदग्रसरसिस्नात्वामहाविद्यांविलोकयेत्

पिण्डारकं ततो दृष्ट्वा ततो भैरवदर्शनम् । अष्टम्याञ्च चतुर्दश्यामेषा यात्रा फलप्रदा

अङ्गारकचतुर्थ्यां तु पूर्वोक्ता देवता अपि । विघ्नेशश्च ततः पश्येत्सर्वकामार्थसिद्धये

प्रातरुत्थाय मतिमान्ब्रह्मकुण्डजले प्लुतः । विष्णुंविष्णुहरिंदृष्ट्वामनोवाक्कायशुद्धिमान्

मन्त्रेश्वरं ततोदृष्ट्वा महाविद्यां विलोकयेत् ।

अयोध्यां च ततो दृष्ट्वा सर्वकामार्थसिद्धये ॥ ६६ ॥

स्वर्गद्वारेनरःस्नात्वासचैलोविजितेन्द्रियः । नानाविधानिपापानिबहुजन्मकृतानि च

सचैलस्नानतो यान्ति तस्मात्सचैलमाचरेत् ॥ ६७ ॥

एषा वै गदिता यात्रा सर्वपापहरा शुभा ॥ ६८ ॥

य एवं कुरुते यात्रां नित्यं शुभफलप्रदाम् । न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि

तस्मात्त्वमपि विप्रेन्द्र! अयोध्यां व्रज माचिरम् ।

तत्र गत्वा क्रमेणैव यात्रां कुरु यतेन्द्रियः ॥ ७० ॥

अयोध्या परमं स्थानं अयोध्या परमं महत् ।

अयोध्यायाः समा काचित्पुरी नैव प्रदृश्यते ॥ ७१ ॥

अयोध्या परमं स्थानं विष्णुचक्रे प्रतिष्ठितम् ॥ ७२ ॥

इत्येतत्कथितं विप्र मया पृष्टं हि यत्त्वया । समाश्रय मुने! तां त्वमनुजानीहिमामतः

सूत उवाच

इत्येतदुक्त्वा विरते मुनौ कलशजन्मनि । उवाचमधुरं वाक्यंव्यासःसतपसांनिधिः

व्यास उवाच

धन्योऽस्म्यनुगृहीतोऽस्मि कृतकृत्योऽस्म्यहं मुने! ।

सत्यं शौचं श्रुतं विप्रं सुशीलं च क्षमाऽऽर्जवम्

सर्वञ्च निष्फलं तस्य अयोध्यां नाऽऽगतो यदि ॥ ७५ ॥

यस्मिन्मयिप्रसन्नेनत्वयोक्तोधर्मनिर्णयः । इदानीमपिगच्छामिह्ययोध्यांनिर्मलांपुरीम्

त्वमपि व्रज विप्रेन्द्र! स्वमाश्रमपदं निजम् ॥ ७६ ॥

सूत उवाच

इत्येवमुक्त्वाक्रमशोयात्राविधिमनुत्तमम् ।

जगाम तपसांराशिरगस्त्यःकुम्भसम्भवः ॥ ७७ ॥

स्वमाश्रमपदं धीरो विस्मयोत्फुल्ललोचनः ।

व्यासोऽपि महसां राशिर्जगाम विजितेन्द्रियः ॥ ७८ ॥

अयोध्यामागतो विप्रः सर्वकामार्थसिद्धये । आगत्यैतद्विधानेनकृत्वायात्रांयथाक्रमम्
दृष्ट्वा महाश्चर्यकरं कारणं तीर्थमुत्तमम् । आनन्दतुन्दिलस्तत्रसम्यगाचम्य बुद्धिमान्

ततो जगाम विप्रेन्द्रः स्वमाश्रमपदं मुनिः ।

व्यासेन कथितं मह्यं माहात्म्यं क्रमशस्तदा ॥ ८१ ॥

मया श्रुत्वा च माहात्म्यंयात्रां कृत्वाविधानतः । कुरुक्षेत्रेसमागत्यभवदग्रेनिरूपितम्
इदं माहात्म्यतुलंयः पठेत्प्रयतो नरः । श्रद्धया यश्च शृणुयात्सयाति परमां गतिम् ॥
तस्मादेतत्प्रयत्नेन श्रोतव्यश्च जनैः सदा । द्विजपूजा विष्णुपूजाविधातव्या प्रयत्नतः
दातव्यश्च सुवर्णादि यथाशक्त्या द्विजन्मने । पुत्रार्थीलभतेपुत्रान्धर्मार्थीधर्ममाप्नुयात्

अतिविपुलविधानैर्वर्णितं धर्म्यमाद्यं कलयति परभक्त्या क्षेत्रमाहात्म्यमेतत् ।
य इह मनुजवर्यः श्रीसनाथः स सम्यग्व्रजति हरिनिवासं सर्वभोगांश्च भुक्त्वा
यः पाठकस्यापि कदाचिदेव ददाति वित्तं च यथाऽऽत्मशक्त्या

पात्राणि वस्त्राणि मनोहराणि रौप्यं सुवर्णञ्च गवीः स मुच्येत् ॥ ८७ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां द्वितीये वैष्णवखण्डे-
ऽयोध्यामाहात्म्येऽगस्त्यव्याससम्वादेऽयोध्यायात्राविधिक्रमवर्णनं
नाम दशमोऽध्यायः ॥ १० ॥

समाप्तमिदमयोध्यामाहात्म्यम्